७० चतुःषष्टिः द्रौणिं ततोयधज्वाविलासितोयचापः १ नैकान्वहून् २ उवाचनयघ्नछ ७

गच्छन्नेवतुकौंतेयोधर्मराजदिदृक्षया सैन्यमालोकयामासनापश्यत्तत्रचाच्युतं ६९ युद्धंकृत्वातुकौंतेयोद्रोणपुत्रेणभार ८२
त दुःसहंवज्रिणासंख्येपराजित्यगुरोःसुतं ७० इतिकर्णपर्वणि संजयउवाच द्रौणिंपराजित्यततोग्रधन्वाकृत्वामहद्दुष्करंशू
रकर्म आलोकयामासततःससैन्यंधनंजयःशत्रुभिरप्रधृष्यः १ अयुध्यमानान्पृतनामुखस्थान्स्वैःशूरान्हर्षयन्सव्यसाची पू
र्वापदानैः प्रथितैःप्रशंसन्स्थितान्महात्मासरथाननेकान् २ अपश्यमानस्तुकिरीटमालीयुधिष्ठिरंभ्रातरमाजमीढं उवाचभीमंत
रसाभ्युपेत्यराज्ञः प्रवृत्तिंत्विहकुत्रराजा ३ भीमसेनउवाच अपयातइतोराजाधर्मपुत्रोयुधिष्ठिरः कर्णबाणाभितप्तांगोयदिजी
वेत्कथंचन ४ अर्जुनउवाच तस्माद्भवान्शीघ्रमितःप्रयातुराज्ञःप्रवृत्त्यैकुरुसत्तमस्य नूनंसविद्धोतिभृशंपृषत्कैःकर्णेनरा
ज्ञाशिबिरंगतोसौ ५ यःसंप्रहारेनिशितैःपृषत्कैर्द्रौणेर्विद्धोतिभृशंतरस्वी तस्थौसतत्रापिजयप्रतीक्षोद्रोणेपियावन्नहतः
किलासीत् ६ ससंशयंगमितःपांडवाग्र्यःसंख्येद्यकर्णेनमहानुभावः ज्ञातुंप्रयाह्याशुतमद्यभीमस्थास्याम्यहंशत्रुगणान्निरुध्य ७

क०
२२६

गोष्ठातस्थानात् ९ भ्रातुर्वचनंश्रुत्वातद्देवसत्यंवचोनारायणंउनितकपिध्वजउवाचेसव्वयः १५ प्रत्यनीकेशत्रुसे...प्रे ॥ ॥ ॥ ॥ ॥

हि१तु१ घ१

भीमसेनउवाच त्वमेवजानासिमहाभावराज्ञः प्रदत्तोभरतर्षभस्य अहंहियर्ज्जुनयाम्यमित्रावहंतिमांभीतइतिप्रवीराः ८ ततोब्रवीदर्जु
नोभीमसेनंसंसप्तकाः संतनीकेस्थितामे एतानहत्वाद्यमयानशक्यमितोययातुंरिपुसंघगोष्ठात् ९ अथाब्रवीदर्जुनंभीमसेनः
स्ववीर्यमासाद्यकुरुप्रवीरः संसप्तकान्प्रतियास्यामिसंख्येसर्वानहंयाहिधनंजयत्वं १० तद्भीमसेनस्यवचोनिशम्यसुदुष्करंभ्रा
तुरमित्रमध्ये संसप्तकानीकमसह्यमेकः सुदुष्करंवारयामीतिपार्थः ११ उवाचनारायणमप्रमेयंकपिध्वजःसत्यपराक्रमस्य
श्रुत्वावचोभ्रातुरहीनसत्वस्तदाहवेसत्यवचोमहात्मा ११ इष्टुंकुरुश्रेष्ठमभिप्रयास्यन्सोवाचवृष्णिप्रवरंतदानीं अर्जुनउवा
च चोदयाश्वान्हृषीकेशविहायेतद्बलार्णवं अजातशत्रुराजानंद्रष्टुमिच्छामिकेशव १२ संजयउवाच ततोहयान्सर्वदाशाह
मुख्यः प्रचोदयद्भीममुवाचचेदं नैतच्चित्रंतवकर्माद्यभीमयास्याम्यहंजहिपार्थारिसंघान् १४ ततोपययौहृषीकेशोयत्रराजा
युधिष्ठिरः शीघ्राच्छीघ्रतरंराजन्वाजिभिर्गरुडोपमैः १५ प्रत्यनीकेष्ववस्थाप्यभीमसेनमरिंदमं संदिश्यचैनंराजेंद्रयुद्धंप्रतिवृ
कोदरं १६ ॥ ॥ ॥ ॥ ॥

छामि२

राम०
१३६
१३७
१३८
१३९

ततस्तुगत्वापुरुषप्रवीरौराजानमासाद्यशयानमेकं रथादुभौप्रत्यवरुह्यतस्माद्ववंदतुर्धर्मराजस्यपादौ १७ तंदृष्ट्वापुरुषव्याघ्रंहृष्टे
मिणंपुरुषर्षभं मुदाभ्युपगतौकृष्णावश्विनाविववासवं १८ तावभ्यनंदद्राजापिविवस्वानश्विनाविव हतेमहासुरेजंभेशक्रविष्णू
यथागुरुः १९ मन्यमानोहतंकर्णंधर्मराजोयुधिष्ठिरः हर्षगद्गदयावाचाप्रीतःप्राहपरंतपः २० संजयउवाच अथोपयातौपृथुलोहि
ताक्षौशराचितांगौरुधिरप्रदिग्धौ समीक्ष्यसेनाग्रनरप्रवीरौयुधिष्ठिरोवाक्यमिदंबभाषे २१ महासत्वौहितौदृष्ट्वासहितौकेशवार्जुनौ हत
माधिरथिंमेनेसंख्येगांडीवधन्वना २२ तावभ्यनंदत्कौंतेयः साम्नापरमवल्गुना स्मितपूर्वममित्रघ्नःपूजयन्भरतर्षभ २३ इतिश्रीकर्णपर्व
णि युधिष्ठिरउवाच स्वागतंदेवकीमातः स्वागतंतेधनंजय प्रियंमेदर्शनंगाढंयुवयोरच्युतार्जुनौ १ अक्षताभ्यामरिष्टाभ्यांहतःकर्णो
महारथः आशीविषसमंयुद्धेसर्वशस्त्रविशारदं २ अग्रगंधार्तराष्ट्राणांसर्वेषांशर्मवर्मच रक्षितंवृषसेनेनसुषेणेनचधन्विना ३ अनु
ज्ञातंमहावीर्यरामेणास्त्रेषुदुर्जयं अग्र्यंसर्वस्यलोकस्यरथिनंलोकविश्रुतं ४

६ आनिलानिलयोरिति क्रमान्नेत्रोबलाभ्यां १५ मृणेत्रप्रछिन्ने सति पातः पलायितोस्मि वाध्रीणसः मेषविशेषः यस्य नासापुटयोर्वध्रीसदृशं चर्मभवति हि

त्रातारंधार्तराष्ट्राणांगंतारंवाहिनीमुखे हंतारमरिसैन्यानां [illegible] ममित्रगणमर्दनं ५ दुर्योधनहितेयुक्तमसह्यंदुःखायचोद्यतं अ
प्रधृष्यंमहायुद्धे देवैरपिसवासवैः ६ अनलानिलयोस्तुल्यंतेजसाचबलेनच पातालमिवगंभीरंसत्त्ववंतंनंदिवर्द्धनं ७ अनेकाम
मित्राणांहत्वाकर्णमहामृधे दिष्ट्यायुवामनुप्राप्तौजित्वासुरमिवामरौ ८ घोरंयुद्धमदीनेनमयात्वसाच्युतार्जुनौ कृतंतेनांतकेने
वप्रजाः सर्वाजिघांसता ९ तेनकेतुस्त्वमेछिन्नोहतौवपार्ष्णिसारथी हतवाहस्ततःशाल्यिंयुयुधानस्यपश्यतः १० धृष्टद्युम्नस्ययम
योर्वीरस्यचशिखंडिनः पश्यतांद्रौपदेयानांपंचालानांचसर्वशः ११ सतानजित्वामहावीर्यःकर्णः शत्रुगणान्बहून् जितवान्मांमहा
बाहोयतमानोमहारणे १२ अभिसृत्यचमांयुद्धेयत्करोषाणपुक्तवाबहु तत्ततत्युधांश्रेष्ठप्रीभूयनसंशयः १३ भीमसेनप्रभावाद्युयज्जी
वामिधनंजय बहुनात्रकिमुक्तेननाहंतत्सोढुमुत्सहे १४ त्रयोदशाहंवर्षाणियस्माद्भीतोधनंजय नस्मनिद्रांलभेरात्रौनचाहनिसुखं
क्वचित् १५ तस्यद्वेषेणसंयुक्तः परिदह्येधनंजय आत्मनोमरणंजानन्वाध्रीणसइवद्विजः १६

जरतिपाठेहृस्वगृहीवारक्तशिरांश्वेतपक्षोविहंगमः सचैववाध्रीणसः प्रोक्तोयाज्ञिकैः पितृकर्मणीतिशेषः १६ ॥ ॥ ॥ ॥

त्रस्तोयमगमत्कालश्चिंतयानस्समेचिरं कथंकर्णोमयाशक्योयुद्धेहंतुमपिप्रभवेत् १७ जाग्रत्स्वपंश्चकौंतेयकर्णमेवमहारथं पश्यामितत्र
तत्रैवकर्णभूतमिदंजगत् १८ यत्रयत्रहिगच्छामिकर्णाद्भीतोधनंजय तत्रतत्रहिपश्यामिकर्णमेवाग्रतस्थितं १९ सोहंतेनैववीरे
णसमरेष्वपलायिना सहयः सरथः पार्थजित्वाजीवन्विसर्जितः २० कोनुमेजीवितेनार्थोराज्येनार्थोभवेत्पुनः ममैवंधिक्कृतस्याद्यकर्णे
नाहवशोभिना २१ नप्राप्तपूर्वंयद्भीष्मात्कृपाद्द्रोणाच्चसंयुगे तत्प्राप्तमद्यमेयुद्धेसूतपुत्रान्महारथात् २२ सत्वांपृच्छामिकौंतेययथाह्य
कुशलस्तथा तन्ममाचक्ष्वकार्त्स्न्येनयथाकर्णोहतस्त्वया २३ शक्रतुल्यबलोयुद्धेयमतुल्यःपराक्रमे रामतुल्यस्तथास्त्रेणसकथंवैनिषू
दितः २५ महारथः समाख्यातः सर्वयुद्धविशारदः धनुर्धराणांप्रवरः सर्वेषामेकपूरुषः २६ पूजितोधृतराष्ट्रेणसपुत्रेणविशांपते त्वदर्थ
मेवराधेयः सकथंनिहतस्त्वया २७ धार्तराष्ट्रोहियोधेषुसर्वेष्वेवसदार्जुन तवमृत्युंरणेकर्णमन्यतेपुरुषर्षभ २८ सत्वयापुरुषव्याघ्रक
थंयुद्धेनिषूदितः तन्ममाचक्ष्वकौंतेययथाकर्णोहतस्त्वया २९ युध्यमानस्यवशिरः पश्यतांसुहृदांहृतं त्वयापुरुषशार्दूलसिंहेनेवयथा
रुरोः ३० यः पर्युपासीत्प्रदिशोदिशश्चत्वांसूतपुत्रः समरेपरीप्सन् दित्सुःकर्णः समरेहस्तिषड्गवंयः सहीदानींकंकपत्रैः सुतीक्ष्णैः ३१
त्वयारणेनिहतः सूतपुत्रः कच्चिच्छेतेभूमितलेदुरात्मा प्रियश्चमेपरमोवैकृतोयंत्वयारणेसूतपुत्रंनिहत्य ३२ यः सर्वतः पर्यपतत्त्व

दर्पेसदार्वितेमर्षितः सूतपुत्रः सम्पूरमानीसमरे समेत्य कच्चित्त्वया निहतः संयुगे सौ ३३ रौक्मं वरं हस्तिगवाश्वयुक्तं रथं प्रदित्सुर्यः परेभ्यस्त्वदर्थे
सदास्पर्धते यः स पापः कच्चित्त्वया निहतस्तात युद्धे ३४ यो सौ मदाच्छूरमदेन मत्तो विकत्थते संसदि कौरवाणां प्रियो त्यर्थं तस्य सुयोधनस्य
कच्चित्स पापो निहतस्त्वयाद्य ३५ कच्चित्समागम्य धनुःप्रयुक्तैस्त्वत्प्रेषितैर्लोहितांगैर्विहंगैः शेते स पापः सुविभिन्नगात्रः कच्चिद्भग्नौ धार्त्त
राष्ट्रस्य बाहू ३६ यो सौ सदा श्लाघते राजमध्ये दुर्योधनं हर्षयन्दर्पपूर्णः अहं हन्ता फाल्गुनस्येति मोहात्कच्चिद्वचस्तस्य न वै तथा तत् ३७ ना
हं पादौ धावयिष्ये कदाचिद्यावत्स्थितः पार्थ इत्यल्पबुद्धिः व्रतं तस्यैतत्सर्वदा शक्रसूनो कच्चित्त्वया निहतः सोद्य कर्णः ३८ यो सौ कृष्णामब्रवीद्दु १५
ष्टबुद्धिः कर्णः सभायां कुरुवीरमध्ये किं पांडवांस्त्वं न जहासि कृष्णे सुदुर्बलान्पतितान्हीनसत्वान् ३९ यो सौ कर्णः प्रत्यजानात्त्वदर्थे नाहंह
त्वा सह कृष्णेन पार्थं इहोपयातेति स पापबुद्धिः कच्चिच्छेते शरसंभिन्नगात्रः ४० कच्चित्संग्रामो विदितो वै तवायं समागमे सृंजयकौरवाणां
यत्रावस्थामीदृशीं प्रापितो हं कच्चित्त्वया सो घ हतो दुरात्मा ४१ कच्चित्त्वया तस्य समंदबुद्धेर्गांडीवमुक्तैर्विशिखैर्ज्वलद्भिः सकुंडलं भानुम
दुत्तमांगं कायात्प्रकृत्तं युधि सव्यसाचिन् ४२ यत्तन्मया बाणसमर्पितेन ध्यातो सि कर्णस्य वधाय वीर तन्मे त्वया कच्चिदमोघमद्य ध्यानं हृ
तं कर्णनिपातनेन ४३ यद्दर्पपूर्णः स सुयोधनो स्मानुदीक्षते कर्णसमाश्रयेण कच्चित्त्वया सो घ समाश्र ॥ ॥ ॥

योस्मभग्नः पराक्रमस्तुयोधनस्य ४४ योनः पुराषंढतिलानवोचत्सभामध्येकौरवाणांसमक्षं सदुर्मतिः कच्चिदुपेत्यसंख्येत्वयाहृ
तः सूतपुत्रोत्यमर्षी ४५ यः सूतपुत्रः प्रहसन्नराज्ञापुराब्रवीन्निर्जितान्सौबलेन स्वयंप्रसह्यानययाज्ञसेनीमपीहकच्चित्सहतस्त्वयाद्य
४६ यः शस्त्रभृच्छ्रेष्ठतमंपृथिव्यांपितामहंव्याक्षिपदल्पचेताः संख्यायमानोर्धरथः सकच्चित्त्वयाहतोद्याधिरथिर्महात्मन् ४७ अमर्ष
जंनिकृतिसमीरणेरितंहृदिस्थितंज्वलनमिमंसदामम हतोमयासोद्यसमेत्यकर्णइतिब्रुवन्प्रशमयमेद्यफाल्गुन ४८ ब्रवीहिमेदुर्लभमेतद
द्यकथंत्वयानिहतः सूतपुत्रः अनुध्यायेत्वांसततंप्रवीरहत्रेहतेसोमगवान्निवेदः ४९ इतिश्रीमहाभारतेकर्णपर्वणि संजयउवाच तद्धर्म
शीलस्यवचोनिशम्यराज्ञः क्रुद्धस्य[illegible]रथोमहात्मा उवाचदुर्धर्षमदीनसत्वंयुधिष्ठिरंजिष्णुरनंतवीर्यः १ अर्जुनउवाच संसप्तकैर्युध्यमा
नस्यमेद्यसेनाग्रयायीकुरुसैन्येषुराजन् आशीविषाभान्नगमान्प्रमुंचन्द्रौणिः पुरस्तात्सहसाभ्यतिष्ठत् ३ दृष्ट्वारथंमेघरवंममैवसमस्तसेना
चरणोभ्यतिष्ठत् तेषामहंपंचशतानिहत्वाततोद्रौणिमगमंपार्थिवाग्र्य समांसमामाद्यनरेंद्रयत्नः समभ्युपेतः समरेद्विनेंद्रः अकार्षीद्विरथि
नामुद्विग्नांभूमियाराजन्वध्यतांकौरवाणां ततोरणेभारतदुः प्रकंप्यआचार्यपुत्रः प्रवरः कुरूणां ४ मामर्दयामासशितैः पृषत्कैर्जनार्द
नंचैवविषाग्निकल्पैः ५ अष्टौगवामष्टशतानिबाणान्मयाप्रयुद्धस्यवहंतितस्य तांस्तेनमुक्तान्हमस्यबाणौर्व्यनाशयंवायुरिवाभ्रजालं

क०
१४२

ततोपराण्वाराणसंख्यानेनेकानाकर्णसृष्टापतत्तविषयुक्तान् समर्जेशिक्षाबलप्रयत्नैस्तथायथाप्राहषिकालमेघः ७ नैवाददानंनचसंदधा
नंजानीमहेकतरेणास्यतीति वामेनवायदिवांदक्षिणेनमहेद्रोणपुत्रः समरेपर्यवर्तत ८ तस्यातंतमंडलमेवसम्यग्दृश्यतेकार्मुकंद्रोण
स्तनोः सोविध्यन्मांपंचभिर्द्रोणपुत्रः शितैःशरैःपंचभिर्वासुदेवं ९ चाहंतुदितंत्रिंशतावज्रकल्पैः समार्दयंनिमिषस्यांतरेण क्षणात्स्वावि
त्समरूपोबभूवममार्दितोमहिस्पष्टैः पृषत्कैः १० सविक्षरन्रुधिरंसर्वगात्रैरथानीकंसूततस्तोविवेश मयाभिभूतान्सैनिकानांप्रवहीन्न
सोप्रपश्यन्रुधिरप्रदिग्धान् ११ ततोभिभूतंयुधिवीक्ष्यसैन्यंविनष्टयोधंद्रुतवाजिनागं पंचाशतारथमुख्यैः समेत्यकर्णस्त्वर
न्यामुपयात्प्रमाथी १२ तान्नदृपित्वाहमथास्मकर्णाद्द्रष्टुंभवंतंत्वरयाभियातः सर्वेपंचालाह्युद्विजंतेस्मकर्णाद्दृष्ट्वागावः केसरिणांयथैव
१३ मत्योरास्यंव्यात्तमिवाप्ययथप्रभद्रकाः कर्णमासाद्यराजन्न रथांस्तुतान्सप्तशतान्निमग्नांस्तहाकर्णः प्राहिणोन्मृत्युलोकान् १४ नचाप्य
भूत्त्वोनमनाः सराजन्मावन्नास्मान्दृष्टवान्सूतपुत्रः श्रुत्वाहत्वांतेनदृष्टंसमेतंमन्येयाम्नापूर्वतरंहतंच १५ मन्येकालमुपयातसराजन्नराक्त
गणिनेहमचिंत्यकर्मन् मयाकर्णस्याह्वमिदंपुरस्ताद्युद्धेदृष्टंपांडवचित्ररूपं १६ नह्यस्ययोद्धाविद्यतेसंजयानांमहारथंयोधसहेतकर्णं शैने
योमेसात्यकिस्त्वकरक्षोधृष्टद्युम्नस्त्वापितथैवराजन् १७ युधामन्युश्चोत्तमोजाश्चशूरोपृष्ठतोमांरक्षतांराजपुत्रौ रथप्रवीरेणमहानुभाव राम०

श्री२

१४२

द्विषत्सैन्येचवनेनादुरुत्तरेण १८ समेत्याहंसूतपुत्रेणसंख्येवृत्रेणेववज्रीवनरेंद्रमुख्य योत्स्याम्यहंभारतसूतपुत्रमस्मिन्संग्रामेयदिवैदृश्यतेद्य
१९ आयाहिपश्याद्ययुयुत्समानंमांसूतपुत्रंचरणेनराग्र्य महर्षभंसेवमुखंप्रपन्नाः प्रभद्रकाःकर्णमभिद्रवंति २० वृद्धाहताभारतराजपुत्राः
स्वर्गायलोकायरणेनिमग्नाः कर्णेनचेद्यघनिहन्मिराजन्स्तवांधवंयुध्यमानंप्रसह्य २१ प्रतिश्रुत्याकुर्वतोवैगतिर्याकाष्टायानात्वामहंराजनिमंह
आमंत्रयेत्वांब्रूहिजयंरणोमेपुराभीमंधार्त्तराष्ट्रग्रसंते २२ सौतिंहनिष्यामिनरेंद्रसिंहसैन्यंतथाशत्रुगणांश्चसर्वान् इतिश्रीमाहाभारतेकर्णप
र्वणि संजयउवाच श्रुत्वाकर्णकल्पमुदारवीर्यंक्रुद्धःपार्थःफाल्गुनस्यामितौजाः धनंजयंवाक्यमुवाचचेदंयुधिष्ठिरःकर्णशराभितप्तः १
विप्रद्रुतातातवमूलदीयातिरस्कृताचाद्ययथानसाधु भीतोभीमंत्यज्यचायांस्तथात्वंयन्नाशकःकर्णमथोनिहंतुं २ स्नेहस्त्वयापार्थ[illegible]
थायागर्भंसमाविश्ययथानसाधु त्वत्कारणेयद्यायाःसमीमंयन्नाशकःसूतपुत्रंनिहंतुं ३ यत्तद्वाक्यंद्वैतवनेत्वयोक्तंकर्णंहंतास्म्येकरथेन
सत्यं त्वक्त्वातंवैकथमद्यापयातःकर्णाद्भीतोभीमसेनंविहाय ४ इदंयदिद्वैतवनेप्यवक्ष्यःकर्णंयोद्धुंनप्रसह्येनृपेति वयंततःप्राप्तकालंचस
र्वेकृत्वास्युपेयाममतंथैवपार्थ ५ मयिप्रतिश्रुत्यवधंहितस्यनवैकृतंतत्तथैववीर आनीयनःशत्रुमध्यंसकस्मात्समुत्क्षिप्यस्थंडिलेप्रत्यपि
ष्टाः ६ अथाशिष्मवयमर्जुनत्वंयियासवोवद्वकल्याणमिष्टं तन्नःसर्वंविफलंराजपुत्रफलार्थिनोविफलइवातिपुष्पः ७ प्रच्छादितंवडिशमिवा

क० १४२

न२ प२

मिषेणासंछादितंगरलमिवा शनेन अनर्थकंमेहाशितवानसिलराज्यार्थिनोराज्यरूपंविनाशं ८ त्रयोदशेमाद्दिसमाः सद्भावपंत्यामनुनीविषयवनेम
याशया कालेवर्षेदेवमिवोप्तवीजंनत्र्नः सर्वान्नरकेतांवनमजः ९ यत्तत्त्वयावागुवाचांतरिक्षेससाहजातेत्वपि मंस्वबुद्धो जातः पुत्रोस्यविक्रमोयं
शक्रः सर्वान्शत्रूवानजेष्यतीति १० अयंपंजेतारवांडवेदेवसंघान्सर्वाणिभूतानपिचोत्तमौजाः अयंसंजेतामद्रकलिंगकेकयानयंकुरूनाजिमध्येनिहंता
११ अस्मात्परोनोभ वितायनुर्धरोनैनंभूतंकिंचनजातुजेता इच्छेद्यंसर्वभूतानिकुर्याद्धशेवशीसर्वसमास विघः १२ कांत्याशशांकसमजवेनवा
योः स्थैर्येणमेरोः क्षमयापृथिव्याः सूर्यस्यभासाधनदस्यलक्ष्म्याशौर्येणशक्रस्यबलेनविष्णोः १३ तस्येमहात्मातवकुंतिपुत्रोजातोदितेर्विष्णु
रिवारिहंता स्वेषांजयायद्विषतांवधायख्यातोमितौजाः कुलतंतुकर्त्ता १४ इत्यंतरिक्षेशतशृंगमूर्ध्नितपस्विनांशृण्वतांवागुवाच एवंविधंतव
नाभूत्तथाचदेवापिनूनमनंतंवदंति १५ तथापरेषामृषिसत्तमानांश्रुत्वागिरः पूजयतांसदात्वां नसंनतिंमसुयोधनस्यत्वांजानानाम्याधिरथेर्भया
न्नै १६ त्वष्ट्राकृतंवाहमकूजनाक्षंशुभंसमास्थायकपिध्वजंतं खड्गंगृहीत्वाहेमपृष्ठंधनुश्चदेवंगांडिवंतालमात्रं १७ सकेशवेनोह्य
मानः कथंत्वंकर्णाद्भीतोव्यपयातोसिपार्थ धनुश्चैतत्केशवायप्रयच्छयंताभविष्यस्त्वरणेकेशवस्य। ॥ ॥ ॥

प्र३

क० १४२

म १८ तदाहनिष्पन्केशवः कर्णमुग्रं महत्पारिर्हत्रमिवाग्निवज्रः गांधीवमेतं पदिनाघशक्तस्त्वं तमुग्रं प्रतिवाधनाय १९ प्रपद्यान्नस्मे गांडीवमेतत्
दघत्वत्तोयोस्त्रैरम्यधिकोवानेंद्रः अस्मात्त्वेवं पुत्रदोर्विहीनानस्त्रवान्द्रष्टान्त्राजनाशाच्चभूयः २० दृष्ट्वालोकः पतितानयगांधीवपापैर्नृषे
नरकेपांडवेय मासेपतिष्यः पंचमेत्वं मुकुछ्रेनवागर्भेत्रभविष्यः पृथापाः २१ ततेजन्मेयोराजपुत्राभविष्यन्त्वेचत्संग्रामादयपानंदुरान्मनः
इतिश्रीमहाभारतेकर्णपर्वणि संजयउवाच युधिष्ठिरेणैवमुक्तः कौंतेयः श्वेतवाहनः असिंजग्राहसंक्रुद्धोजिघांसुर्भरतर्षभ १
तस्यकोपंसमुद्वीक्ष्यचित्तज्ञः केशवस्तदा उवाचकिमिदंपार्थगृहीतः खड्गइत्युत २ नहिपश्यामियोद्धव्यंतत्वयाकिंचिद्धनंजय तेग्रस्ता
धार्तराष्ट्राहिभीमसेनेनधीमता ३ अपयातोसिकौंतेयराजाद्रष्टव्यइत्यपि सराजाभवताद्दृष्टः कुशलीचयुधिष्ठिरः ४ सदृष्ट्वान्पशार्दू
लंशार्दूलसमविक्रमं हर्षकालेचसंप्राप्तेकिमिदंमोहकारितं ५ नतंपश्यामिकौंतेययस्तेवध्योभविष्यति प्रहर्तुमिच्छसेकस्मात्किंवातेचित्तवि
भ्रमः ६ कस्मात्त्वान्महाखड्गंपरिगृह्णासिसत्वरः तत्त्वांपृच्छामिकौंतेयकिमिदंतेचिकीर्षितं ७ परामृषसियत्क्रुद्धः खड्गमद्भुतविक्रमः
एवमुक्तस्तुकृष्णेनप्रेक्षमाणोयुधिष्ठिरं ८ अर्जुनः प्राहगोविंदंक्रुद्धः सर्पइवश्वसन् अन्यस्मैदेहिगांडीवमितिमांयोभिचोदयेत् ९ भिं
द्यामहंतस्यशिरइत्युपांशुव्रतंमम तदुक्तंममचानेनराज्ञामितपराक्रम १० समक्षंतवगोविंदनतत्क्षंतुमिहोत्सहे तस्मादेनंवधिष्यामि

क०
१४४

राजानंधर्मभीरुकं ११ प्रतिज्ञांपालयिष्यामिहत्वेनंनरसत्तमं एतदर्थममपारवद्धोग्रहीतोपयदुनंदन १२ सोहंयुधिष्ठिरंहत्वासत्यसत्त्वापतोगतः वि
शोकोविज्वरश्चापिभविष्यामिजनार्दन १३ किंवात्वंमन्यसेप्राप्तमस्मिन्कालउपस्थिते त्वमस्यजगतस्तातवेत्थसर्वंगतागतं १४ तत्तथाप्रकरिष्यामि
यथामांवक्ष्यतेभवान् संजयउवाच धिग्धिगित्येवगोविंदः पार्थमुक्त्वाब्रवीत्पुनः १५ कृष्णउवाच इदानींपार्थजानामिनवृद्धाःसेवितास्त्वया
कालेनपुरुषव्याघ्रसंरंभेयन्त्वानगात् १६ नहिधर्मविभागज्ञःकुर्यादेवंधनंजय यथात्वंपांडवाद्यहधर्मभीरुरपंडितः १७ अकार्याणांक्रि
याणांचसंयोगंयःकरोतिवै कार्याणामक्रियाणांचसपार्थपुरुषाधमः १८ अनुसृत्यतुयेधर्मंकवयःसमुपस्थिताः समासविस्तरविदां
नतेषांवेत्सिनिश्चयं १९ अनिश्चयज्ञोहिनरःकार्याकार्यविनिश्चये अवशोमुह्यतेपार्थयथात्वंमूढएववत् २० नहिकार्यमकार्यंवासुखंज्ञा
तुंकथंचन श्रुतेनज्ञायतेसर्वंतच्चत्वंनावबुध्यसे २१ अविज्ञानाद्भवान्यच्चधर्मंरक्षतिधर्मवित् प्राणिनांत्वंवधंपार्थधार्मिकोनावबुध्यसे ॥
२२ प्राणिनामवधस्तातसर्वज्यायान्मतोमम अनृतंवावदेद्वाचंनतुहिंस्यात्कथंचन २३ ॥ ॥ ॥

राम०
१४५

सकथंभ्रातरंज्येष्ठंराजानंधर्मकोविदं हन्याद्भवान्नरश्रेष्ठप्राकृतोन्यःपुमानिव २३ अयुध्यमानस्यवधस्तथाशत्रोश्चमानद पराङ्मु
खस्यद्रवतःशरणंचापिगछतः २४ कृतांजलेःप्रपंनस्यप्रमत्तस्यतथैवच नवधःपूज्यतेसद्भिस्तच्चसर्वंगुरौतव २५ त्वयाचैवंव्रतंपा
र्थबालेनेवकृतंपुरा तस्माद्धर्मसंयुक्तंमौर्ख्यात्कर्मव्यवस्यति २६ सगुरुंपार्थकस्मात्त्वंहंतुकामोभिधावसि असंप्रधार्यधर्माणां
गतिंसूक्ष्मांदुरत्ययां २७ इदंधर्मरहस्यंचतववक्ष्यामिपांडव यद्ब्रूयात्तवभीष्मोहिपांडवोवायुधिष्ठिरः २८ विदुरोवातथाक्षत्ताकुं
तीवापियशस्विनी तत्तेवक्ष्यामितत्त्वेननिबोधैनंधनंजय २९ सत्यस्यवदितासाधुर्नसत्याद्विद्यतेपरं तत्त्वेनैवसुदुर्ज्ञेयंपश्यस
त्यमनुष्ठितं ३० भवेत्सत्यमवक्तव्यंवक्तव्यमनृतंभवेत् यत्रानृतंभवेत्सत्यंसत्यंचाप्यनृतंभवेत् ३१ विवाहकालेरतिसंप्रयोगेप्रा
णात्ययेसर्वधनापहारे विप्रस्यचार्थेह्यनृतंवदेत पंचानृतान्याहुरपातकानि ३२ सर्वस्वस्यापहारेतुवक्तव्यमनृतंभवेत् तत्रा
तं ३
नृतंभवेत्सत्यंसत्यंचाप्यनृतंभवेत् ३३ तादृशंपश्यतेबालोयस्यसत्यमनुष्ठितं भवेत्सत्यमवक्तव्यंनवक्तव्यमनुष्ठितं सत्यानृतेविनि
श्चित्यततोभवतिधर्मवित् ३४ किमाश्चर्यंकृतप्रज्ञःपुरुषोपिसुदारुणं सुमहत्प्राप्नुयात्पुण्यंबलाकोंधवधादिव ३५ ॥

क० १४६

४५ तपस्विनः तपस्विनांइनः श्रेष्ठः ४६ ४७ ४८

किमाश्चर्यंपुनर्योऽधर्मकामोहपंडितः सुमहत्प्राप्नुयात्पापमापगामिवकौशिकः ३६ अर्ज्जुनउवाच आचक्ष्वभगवन्नेतद्यथा
विंदाम्यहंतथा बलाकस्यानुसंबंधंनदीनांकौशिकस्यच ३७ वासुदेवउवाच मृगव्याधोभवत्कश्चिद्बलाकोनामभारत यात्रार्थं
पुत्रदारस्यमृगान्हंतिनकामतः ३८ वृद्धौचमातापितरौबिभर्त्यन्यांश्चसंश्रितान् स्वधर्मनिरतोनित्यंसत्यवागनसूयकः ३९
सकदाचिन्मृगंलिप्सुर्नान्वविंदत्प्रयत्नवान् अथःपिबंतंददृशेश्वापदंघ्राणचक्षुषं ४० अदृष्टपूर्वमपितत्सत्वंतेनहतं
तंतदा अंधेहतेततोव्योम्नःपुष्पवर्षंपपातच ४१ अप्सरोगीतवादित्रैर्नादितंचमनोरमं विमानमागमत्स्वर्गान्मृगव्याधनिनी
षया ४२ तद्भूतंसर्वभूतानामभावायकिलार्ज्जुन तपस्तप्त्वावरंप्राप्तंकृतमंधंस्वयंभुवा ४३ तद्धत्वासर्वभूतानामभावकृ
तनिश्चयं ततोबलाकःस्वरगादेवंधर्मःसुदुर्विदः ४४ कौशिकोप्यभवद्विप्रस्तपस्वीनबहुश्रुतः नदीनांसंगमेग्रामा
द्दूरात्सकिलावसत् ४५ सत्यंमयासदावाच्यमितितस्याभवद्व्रतं सत्यवादीतिविख्यातःसतदासीद्धनंजय ४६ अथदस्यु
भयात्केचित्तदातद्वनमाविशन् तत्रापिदस्यवःक्रुद्धास्तानमार्गंतयत्नतः ४७ अथकौशिकमभ्येत्यप्राहुस्तंसत्यवादिनं क
तमेनपथायाताभगवन्बहवोजनाः ४८

राम० १४६

सस्तेनपृष्टः सब्रूहियदितान्वेत्थशंसनः सपृष्टःकौशिकःसत्यंवचनंतानुवाचह ४९ वहुवृक्षलतागुल्ममेतद्वनमुपाश्रिताः
इतितान्ख्यापयामासतेभ्यस्तत्वंसकौशिकः ५० ततस्तेतान्समासाद्यक्रूराजघ्नुरितिश्रुतिः तेनाधर्मेणमहतावाग्दुरुक्तेनकौशि
कः ५१ गतःसकष्टंनरकंसूक्ष्मधर्मेष्वकोविदः यथाचाल्पश्रुतोमूढोधर्माणामविभागवित् ५२ वृद्धानपृष्ट्वासंदेहंमहच्छ्वभ्रमिहार्ह
ति तत्रतेलक्षणोद्देशःकश्चिदेवभविष्यति ५३ दुःकरंपरमंज्ञानंतर्केणानुव्यवस्यति श्रुतेर्धर्मइतिह्येकेवदंतिवहवोजनाः ५४
नत्वेतत्प्रत्यसूयामिनचसर्वंविधीयते प्रभवार्थायभूतानांधर्मप्रवचनंकृतं ५५ यत्स्यादहिंसासंयुक्तंसधर्मइतिनिश्चयः अहिं
सार्थायहिंस्राणांधर्मप्रवचनंकृतं ५६ धारणाद्धर्ममित्याहुर्धर्मोधारयतेप्रजाः यस्माद्धारणसंयुक्तःसधर्मइतिनिश्चयः
५७ येन्यायेनजिहीर्षंतोधर्ममिछंतिकर्हिचित् अकूजनेनचेन्मोक्षोवानानुकूजेत्कथंचन ५८ अवश्यंकूजितव्येवाशंकेरन्
वाप्यकूजतः श्रेयस्तत्रानृतंवक्तुंतत्सत्यमविचारितं ५९ यःकार्येभ्योव्रतंकृत्वाकर्मणानोपपादयेत् नतत्फलमवाप्नोतिएवमा
हुर्मनीषिणः ६० प्राणात्ययेविवाहेवासर्वज्ञातिवधात्यये नर्मण्यभिप्रहृतेवानचप्रोक्तंमृषाभवेत् अधर्मंनात्रपश्यंतिधर्मत
त्वार्थदर्शिनः ६१ यस्तेनैःसहसंबंधान्मुच्यतेशपथैरपि श्रेयस्तत्रानृतंवक्तुंतत्सत्यमविचारितं ६२ नचतेभ्योधनंदेयंशक्येसति
कथंचन पापेभ्योहिधनंदत्तंदातारमपिपीडयेत् ६३ तस्माद्धर्मार्थमनृतमुक्त्वानानृतभाग्भवेत् एषतेलक्षणोद्देशःसम्यगुद्दिष्टो

यथाविधि ६४ यथार्थमेयथाबुद्धिसमाधैर्वैहितार्थिना एतछ्रुत्वाब्रूहिपार्थयदिवध्योयुधिष्ठिरः ६५ अर्ज्जुनउवाच
यथाब्रूयान्महाप्राज्ञोयथाब्रूयान्महामतिः ६६ हितंचैवयथास्माकंतथैतद्वचनंतव भवान्मातृसमोस्माकंतथापितृस
मोपिच गतिश्चपरमाकृष्णत्वमेवचपरायणं नहितेत्रिषुलोकेषुविद्यतेविदितंक्वचित् तस्मात्त्वानपरंधर्मंवेदसर्वंय
थातथं ६८ अवध्यंपांडवंमन्येधर्मराजंयुधिष्ठिरं अस्मिंस्तुममसंकल्पेब्रूहिकिंचिदनुग्रहं ६९ इदंचापरमत्रै
वम्हृगाहत्स्वंहृविवक्षितं जानासिदाशार्हममव्रतंत्वंयोमांब्रूयात्कश्चनमानुषेषु ७० अन्यस्मैत्वंगांडिवंदेहिपार्थ
त्वत्तोस्त्रैर्वीर्यवित्तावाविशिष्टः हन्यामहंकेशवतंप्रसह्यभीमोहन्यात्तूवरकेतिचोक्तः ७१ तन्मेराज्ञाप्रोक्तवांस्तस
मक्षंधनंदेहीत्यसहत्वनहृष्यामिवीर तंहन्मांचेत्केशवजीवलोकेस्थातानाहंकालमप्यल्पमात्रं ७२ ॥ ॥

एनसानुक्तोपिकृतमायश्चित्तोपिनस्यात्सइत्यर्थः किंकृत्वाराजेवधंप्राप्ता ७५ समक्षंश्रावयेपिरितिशेषः ७६ कर्णोपगीकृतेतद्यूतेयुद्धरूपं ८०

आत्मानंनेहेनमासावापिमुक्तोवधंराजेहंभ्रष्टवीर्योविचेतनाः यथाप्रतिज्ञाममलोकवृद्धौभवेन्मत्याधर्मभृतांवरिष्ठ ७३ यथाजी
वेयमिहवाहंचकृत्स्नतथाबुद्धिंदातुमर्हसिमेत्वं वासुदेवउवाच राजन्श्रांतोविक्षतोदुःखितश्चकर्णेननसंख्येनिशितैर्बाणसंघैः य
श्चानिघ्नंस्सूतपुत्रेणवीरशरैर्भृशंताडितोयुध्यमानः ७४ अतस्त्वमेतेनसरोषमुक्तोदुःखान्वितेनेदमयुक्तरूपं आकोपितो
ह्येषयदिस्मसंख्येकर्णंनिहन्यादितिचाब्रवीत्सः ७५ जानातितंपांडवएवचापिपापंलोकेकर्णममृष्यमन्यैः ततस्त्वमुक्तो
भृशरोषितेनराज्ञासमक्षंपरुषाणिपार्थ ७६ नित्याभियुक्तेसततंचाप्रमेयेकर्णेद्यूतंह्यद्यरणेनिबद्धं तस्मिन्हतेकुरवोनिर्जिता
स्युरेवंबुद्धिःपार्थिवधर्मपुत्र ७७ ततोवधंनार्हतिधर्मपुत्रस्त्वयाप्रतिज्ञार्जुनपालनीया जीवन्मृतंयेननमेतोभवेद्धितन्मेनिबोधेह
भवाननुरूपं ७८ यदामानंलभतेमाननार्हस्तदासवैजीवतिजीवलोके यदावमानंलभतेमहांतंतदाजीवन्मृतइत्युच्यतेसः ७९
संमानितःपार्थिवोयंसदैवत्वयाचभीमेनतथायमाभ्यां वृद्धैश्चलोकेपुरुषैश्चशूरैस्त[illegible] सावमानंकलयाप्रयुंक्ष्व ८०

क° १४८

अत्रभवंतंमान्यंचत्वमितिब्रू हितावतैवतद्वधःकृतोभवतीत्यर्थः ८१ एवंपूजावमानरूपंसंयोगंबाल्मनातुष्टिंकुरु ८२ तत्रमानमाह अथर्वेति ८३ यद्गुरु त्वमितिप्रोक्तस्तत अवधेनशस्त्रपातनंविनैवतेनैववधःवधकार्यंभवतीत्यर्थः ८४ अयुक्तमेवंत्वत्तोवधंवेत्स्यतेनेनाहेह नइतिसास्यतीत्यर्थः समैवैषम्य

त्वमित्यत्रभवंतंहिब्रूहिपार्थयुधिष्ठिरं त्वमित्युक्तोहिनिहतोगुरुर्भवतिभारत ८१ एवमाचरकौंतेयधर्मराजेयुधिष्ठिरे अध र्मयुक्तंसंयोगंकुरुष्वैनंकुरूद्वह ८२ अथर्वांगिरसीह्येषाश्रुतीनामुत्तमाश्रुतिः अविचार्यैवकार्यैषाश्रेयस्कामैर्नरैःसदा ८३ अवधेनवधःप्रोक्तोयद्गुरुस्त्वमितिप्रभुः तद्ब्रूहित्वंयन्मयोक्तंधर्मराजस्यधर्मवित ८४ वधंह्ययंपांडवधर्मराजस्त्वत्तो युक्तंवेत्स्यतेचैवभेषः ततोस्यपादावभिवाद्यपश्चाच्छमंब्रूयाःसांत्वयित्वाचपार्थं ८५ भ्राताप्राज्ञस्तवकोपंनजातुकुर्या द्राजाधर्ममवेक्ष्यचापि मुक्तोनृतात्भ्रातृवधाच्चपार्थहृष्टःकर्णंत्वंजहिसूतपुत्रं ८६ इतिश्रीमहाभारतेकर्णपर्वणि सं जयउवाच इत्येवमुक्तस्तुजनार्दनेनपार्थःप्रशस्याथसुहृद्वधंतत् ततोब्रवीदर्जुनोधर्मराजमनुक्तपूर्वंपरुषंप्रसह्य १ अर्जुनउवाच मांत्वंराजन्व्याहरन्व्याहरस्वयस्तिष्ठसेक्रोशमात्रेरणाद्धि भीमस्तुमामर्हतिगर्हणायायोयुध्यतेसर्वलोक प्रवीरैः २ कालेहिशत्रून्परिपीड्यसंख्येहत्वाचशूरान्पृथिवीपतींस्तान् रथप्रधानोत्तमनागमुख्यान्सादिमेवकाननिताश्च वीरान ३

परिहारंऽऽनमसतितनमःव्याहरव्याहरवचनं क्रोशमात्रंनतिष्ठसित्अपितनोपिदूरेत्यर्थः ३ ॥ ॥

राम° १४८

यः कुंजराणामधिकं सहस्रं हत्वानदंस्तुमुलं सिंहनादं कांबोजानामयुतं पार्वतीयानां गान्धिं हो विनिहत्य वचाजौ ४ स दुष्करं कर्म
करोति वीरः कर्तुं यथा नाहमिति त्वकदाचित् रथादवप्लुत्य गदां परामृश्य लोपानिहत्याश्वरथद्विपान्रणे ५ वरासिना वाजिरथाश्वकुंज
रांस्तथा रथपांगौर्धनुषा दहत्यरीन् प्रगृह्य पन्दुमहितान्निहंति पुनस्तु दोर्भ्यां शतमन्युविक्रमः ६ महाबलो वैश्रवणांतकोपमः प्रसह्य हं
ता द्विषतामनीकिनी सभीमसेनो हतिगर्हणां मे न त्वनिंतरं क्षेमपः सुहृद्भिः ७ महारथान्नागवरान्हयांश्च पदातिमुख्यानपि च प्रम
थ्य एको भीमो धार्त्तराष्ट्रेषु मग्नः समामनुपालब्धुमरिंदमोर्हति ८ कलिंगवंगांगनिषादमागधान्सदामदान्नीलबलाहकोपमान्
निहंति यः शत्रुजनाननेकान्समामनुपालब्धुमरिंदमोर्हति ९ स युक्तमास्थाय रथं हि कोले धनुर्विधुन्वन्नृशरस्त्रीममुष्टिः सृजन्
सौ शरवर्षाणि वीरो महाहवे मेघ इवांबुधाराः १० शतान्यष्टौ वारणानामवश्यं विशातिते कुंभकराग्रहस्तैः भीमसेनाजौ निहतान्
घवारोः समां क्रूरं वक्तुमर्हत्यरिघ्नः ११ बलं तु वाचि द्विजसत्तमानां क्षात्रं बुधा बाहुबलं वदंति लं वाग्बलो भारत निष्ठुरश्च त्वमेव
मां वेत्थ यथा बलो हं १२ यत्ते हि नित्यं न वकर्तुमिष्टं दारैः सुतैर्जीवितेनात्मना च स्वं वपन्नो वाग्विशिखैर्नहंसि लत्नः सुखं न वपं

विघ्नकिंचित् १३

नै १

२२ अनुँयेअश्वत्थामंप्राप्तवानउग्रवर्वहक्रोशान्विकर्षितवान २३ २४

मामामवमंस्थाद्द्रौपदी तत्त्वमस्थामहारथानन्तिहन्मि त्वदर्थे तेनाभिशंकी मारत निष्ठुरोसि त्वत्तः सुखं नाभिजानामि किंचित्
१४ प्रोक्तः स्वपंस्तत्त्वसंधेनमत्तुलत्वप्रियार्थं नरदेवयुद्धे वीरः शिखंडी द्रौपदेयो महात्मा मायाभिगुप्तेन हतस्त्वनेन १५ नचाभि
नंदामि तवाधिराज्यं यतस्त्वमस्वेषु हिताय सक्तः स्वपंस्त्वापायमना पजुष्टमस्माभिर्वाजन्तुमिष्टसंगी सत्त्व १६ अक्षेषु दो
षा वहवो विधर्माः प्रयुतास्त्वया समहदेवो ब्रवीद्यान तान्नैषि लेत्स कुमसाधुजुष्टांस्तेनत्स मसर्वैनिरयं प्रपन्नाः १७
सुखं स्वत्तोनाभिजानामि किंचिद्यतस्त्वमस्मै देवितं संप्रमत्तः स्वपंस्त्वायसनं पांडवत्त्वमस्मात्सौव्राः प्राक्तयस्य चवाचः
१८ शेतेस्माभिर्निहता शत्रुसेनाच्छिन्नैर्गात्रैर्भूमितले निवद्धो त्वपाहितत्कमिहतंतत्तं संपस्माद्दोषं कौरवाणां वधस्त्व १९
हता उदीच्या निहताः प्रतीच्या नष्टाः प्राच्या दाक्षिणात्या विशस्ताः हतं कर्म प्रतिरूपं महद्भिस्तेषां योधैरस्मदीयैश्च युद्धे २०
त्वं देविता त्वत्कृते राजनाशस्त्वत्तं भवं नो व्यसनं नरेन्द्र मास्मान्क्रूरैर्वाक्यतोदैस्तुदंस्त्वं भूयो राजन्कोपयेस्त्वल्पभाग्यः २१ संज
य उवाच राजोवाच पुरुषाः सव्यसाची स्थिरप्रज्ञः प्राक्तपितातत्त्वकक्षाः वभूवासौ विमना धर्मभीरुः हत्वा प्राप्तः पातकं किंचिदेव
२२ ततस्तु तेये सह राजपुत्रा विनिःश्वसंप्राप्तासि मयोद्ववहे तमाहहस्त्वस्तः किमिदं पुनर्भवान्विकोषमाकाशनिभं करोत्यसि २३

२४ २५ २६ २७ आत्मस्तवादात्महत्यापरहत्यास्य कुन्तनादिग्ध्यायतात्पर्यं २८ २९ ३० ३१ ३२ ३३ छ ॥ ॥

ब्रवीहिमांत्वंपुनरुत्तरंवचस्त्वंपार्थप्रवक्ष्याम्यहमर्थसिद्धये इत्येवमुक्तःपुरुषोत्तमेनसुदुःखितःकेशवमर्जुनोब्रवीत् २४ अहंहनिष्येस्वशरीरमेवप्रसह्ययेनाहितमाचरंवै निशम्यतत्पार्थवचोब्रवीदिदंधनंजयंधर्मभृतांवरिष्ठः २५ राजानमेनंत्वमितीदमुक्त्वाकिंकश्मलंप्राविशःपार्थघोरं त्वंचात्मानंहंतुमिच्छस्यरिघ्ननेदंसद्भिःसेवितंवैकिरीटिन् २६ धर्मात्मानंभ्रातरंज्येष्ठमद्यखड्गेनचेन्नंयदि हन्यास्त्वंवीरधर्मान्धभीतस्त्वत्कथंनामतेस्मात्किंचोत्तरंवाकरिष्यस्त्वमेव २७ सूक्ष्मोधर्मोदुर्विदश्चापिपार्थविशेषतोज्ञैःप्रोच्यमानंनिबोध हत्वात्मानमात्मनाप्राप्नुयास्त्वंवधाद्भ्रातुर्नरकंवातिघोरं २८ ब्रवीहिवाचाद्यगुणानिहात्मनस्तथाहतात्माभवितासिपार्थ तथास्तुकृष्णेत्यभिनंद्यतद्वचोधनंजयःप्राहधनुर्विनाम्य युधिष्ठिरंधर्मभृतांवरिष्ठंशृणुष्वराजन्नितिशक्रसूनुः नमादृशोन्योनरदेवविद्यतेधनुर्धरोदेववरादृतेपिनाकिनः २९ अहंहितेनानुमतोमहात्मनाक्षणेनहन्यांसचराचरंजगत् मयाहिराजन्सदिगीश्वरादिशोविजित्यसर्वाभवतःकृतावशे ३० सराजसूयश्चसमाप्तदक्षिणःसभाचदिव्याभवतोममौजसा पाणौपृषत्कानिशितामेमैवधनुश्चसज्यंविततंसबाणं ३१ पादौचमेसरथौसध्वजौचनमादृशंयुद्धगतंजयंति हताउदीच्यानिहताःप्रतीच्याःप्राच्यानिरस्तादाक्षिणात्यानिशस्ताः ३२ संसप्तकानांकिंचिदेवास्तिशिष्टंसर्वस्यसैन्यस्यहतंमयार्द्धं शेतेमयानिहताभारतीयंचमूराजन्देवचमूप्रकाशा ३३ ॥ ॥

ना ५

क०
१५०

येचास्त्रज्ञास्तानहंहन्मिचास्त्रैस्तस्माल्लोकान्नहकरोमिभस्म जैत्रेरथेभीममनास्थायकस्मप्रयावःशीघ्रंसूतपुत्रंनिहंतुं ३४ राजाभवत्स
घस्सुनिर्वृत्तोयंकर्णेरेणानाशयितास्मिवाणैः इत्येवमुक्त्वापुनराहपार्थोयुधिष्ठिरंधर्मभृतांवरिष्ठं ३५ अद्यापुत्रासूतमाताभवित्रीकुंतीवा
मेमयावातेनचापिसत्यं सत्यंवदाम्यघनकर्णमाजौशरैर्हत्वाकवचंविमोक्ष्ये ३६ संजयउवाच इत्येवमुक्त्वापुनरेवपार्थोयुधिष्ठिरंधर्मभृतांव
रिष्ठं विमुच्यशस्त्राणिधनुर्विसृज्यकोषेचखड्गंविनिधायतूर्णं ३७ सव्रीडयानम्रशिराःकिरीटीयुधिष्ठिरंप्राजलिरभ्युवाच प्रसीदराजन्क्षम
यन्मयोक्तंकालेभवान्वेत्स्यतितन्नमस्ते ३८ प्रसीदराजन्ममभित्रसाहस्थितोब्रवीचैवपुनःप्रवीरः नेदंचिरात्क्षिप्रमिदंभविष्यत्यावर्ततेसा
त्वभियास्येचैनं ३९ यावेषभीमंसमराच्चमोक्तुंसर्वात्मनासूतपुत्रंचहंतुं तवप्रियार्थंममजीवितंहिब्रवीमिसत्यंतदवेहिराजन् ४० इतिप्र
यास्यन्नुपगृह्यपादौसमुत्थितोदीप्ततेजाःकिरीटी एतच्छ्रुत्वापांडवोधर्मराजोभ्रातुर्वाक्यंपरुषंफाल्गुनस्य ४१ उत्थायतस्माच्छयनादुवाचपा
र्थंततोदुःखपरीतचेताः कृतंमयापार्थयथानसाधुयेनप्राप्तंव्यसनंवःसुघोरं ४२ तस्माच्छिरश्छिंधिममेदमद्यकुलांतकस्याधमपूरुषस्य पा
पस्यपापव्यसनान्वितस्यविमूढबुद्धेरलसस्यभीरोः ४३ वृद्धावमंतुःपुरुषस्यचैवकिंतेचिरंमेह्यनुसृत्यरूक्षं गच्छाम्यहंवनमेवाद्यपापःसु
खंभवान्वर्ततांमद्विहीनः ४४ योग्योराजाभीमसेनोमहात्माक्लीवस्यवाममकिंराज्यकृत्यं नचापिशक्तःपरुषाणिसोढुंपुनस्तवेमानि
रुषेन्वितस्य ४५

२४

राम०
१५०

४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ सप्ततितमः

भीमस्तुराजाममजीवितेननकार्यमथावमंतस्मवीर इत्येवमुक्त्वासह सोमपानराजानंतत्रसछ्यनंविहाय ४६ इत्येषनिर्गंतुमथ्योव
नायतंवासुदेवःप्रणतोभ्युवाच राजन्विदितमेतद्द्वैपथ्यागांडीवधन्वनः ४७ प्रतिज्ञासत्यसंधस्यगांडीवंप्रतिविश्रुता ब्रूयाद्यएवंगां
डीवमन्यस्मैदेयमित्युत ४८ वध्योस्मस्यपुमांल्लोकेत्वयाचोक्तोयमीदृशं ततःसत्यांप्रतिज्ञांतांपार्थेनप्रतिरक्षता ४९ मच्छंदादवमा
नोयंकृतंस्तवमहीपते गुरूणामवमानोहिवधइत्यभिधीयते ५० तस्मात्वैमहाबाहोममपार्थस्यचोभयोः व्यतिक्रममिमंराजन्स
संरक्षस्वगांप्रति ५१ शरणंत्वांमहाराजप्रपन्नौस्वउभावपि क्षंतुमर्हसिमेराजन्प्रणतस्याभियाचतः ५२ राधेयस्याद्यपापस्य
भूमिःपास्यतिशोणितं सत्यंतेप्रतिजानामिहतंविद्ध्यद्यसूतजं ५३ यस्येछसिवधंतस्यगतमद्यसजीवितं इतिकृष्णवचःश्रुत्वाधर्म
राजोयुधिष्ठिरः ५४ ससंभ्रमंहृषीकेशमुत्थाप्यप्रणतंतदा कृतांजलिस्ततोवाक्यमुवाचानंतरंवचः ५५ एवमेवयथावत्थमस्त्वेषो
विक्रमोमम अनुनीतोस्मिगोविंदतारितश्चास्मिमाधवं ५६ मोचिताव्यसनाद्घोरादद्यवयमच्युत भवंतंनाथमासाद्यसावांव्यसन
सागरात् ५७ घोराद्वयमतुंनौगण्यावुभावज्ञानमोहितौ त्वंबुद्धिप्लवमासाद्यदुःखशोकार्णवाद्वयं ५८ समुत्तीर्णाःसहामात्याःस
नाथास्मत्वयाच्युत ५९ इतिश्रीमहाभारतेकर्णपर्वणि संजयउवाच ॥ ॥ः॥

६३

क०
१५१

धर्मराजस्येतिसप्तार्थः १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५

धर्मराजस्यतछ्रुत्वाप्रीतियुक्तंवचस्ततः पार्थंप्रोवाचधर्मात्मागोविंदोयदुनंदनः १ इतिस्मकृष्णवचनात्प्रत्युच्यार्ययुधिष्ठिरं बभू
वविमनाःपार्थःकिंचित्कृत्वेवपातकं २ ततोब्रवीद्वासुदेवःप्रहसन्निवपांडवं कथंनामभवेदेतद्यदित्वंपार्थधर्मजं असिनाती
क्ष्णधारेणहन्याधर्मेव्यवस्थितं त्वमितिस्मृत्वाथराजानमेवंकश्मलमाविशः ४ हत्वातुनृपतिंपार्थअकरिष्यःकिमुत्तरं एवंहिदुर्वि
दोधर्मोमंदप्रज्ञैर्विशेषतः ५ सभवान्धर्मभीरुत्वाद्ध्रुवंगच्छेन्महत्तमः नरकंघोररूपंचभ्रातुर्ज्येष्ठस्यवैवधात ६ सत्वंधर्मभृतांश्रेष्ठं
राजानंधर्मसंहितं प्रसादयकुरुश्रेष्ठमेतदत्रमतंमम ७ प्रसाद्यभक्त्याराजानंप्रीतेचैवयुधिष्ठिरे प्रयावस्त्वरितौयोद्धुंसूतपुत्रर
थंप्रति ८ हत्वातुसमरेकर्णंत्वमद्यनिशितैःशरैः विपुलांप्रीतिमाधत्स्वधर्मपुत्रस्यमानद ९ एतदत्रमहाबाहोप्राप्तकालंमतंम
म एवंकृतेकृतंचैवतवकार्यंभविष्यति १० ततोर्जुनोवैमहाराजलज्जयावैसमन्वितः धर्मराजस्यचरणौप्रपद्यशिरसाननः ११
उवाचभरतश्रेष्ठंप्रसीदेतिपुनःपुनः क्षमस्वराजन्यत्प्रोक्तंधर्मकामेनभीरुणा १२ दृष्ट्वातुपतितंपादयोर्धर्मराजोयुधिष्ठिरः धनं
जयममित्रघ्नंरुदंतंभरतर्षभ १३ उत्थाप्यभ्रातरंराजाधर्मराजोधनंजयं समाश्लिष्यचसस्नेहंप्ररुरोदमहीपतिः १४ रुदित्वातु
चिरंकालंभ्रातरौसुमहाद्युती कृतशौचौमहाराजप्रीतिमंतौबभूवतुः १५ ॥ ॥ ॥ ॥

राम०
१५१

ततआश्लिष्यतंप्रेम्णामूर्ध्निचाघ्रायपांडवः प्रीत्यापरमयायुक्तोविस्मयंश्चाब्रवीज्जयं १६ कर्णेनमेमहावाहोसर्वसैन्यस्यपश्यतः कवचं
चध्वजंचैवधनुःशक्तिर्हयाःशराः १७ शरैःकृत्तामहेष्वासयत्नमानस्यसंयुगे सोहंज्ञात्वारणेतस्यकर्मदृष्ट्वाचफाल्गुन १८ व्यवसीदामिदुःखेन
नचमेजीवितंप्रियं नचेदद्यहितंवीरंनिहंतासिसंयुगे १९ प्राणानेवपरित्यक्ष्येजीवितार्थोहिकोमम एवमुक्तःप्रत्युवाचविजयोभरतर्ष
भ २० सत्येननेतेशपेराजन्प्रसादेनतथैवच भीमेनचनरश्रेष्ठयमाभ्यांचमहीपते २१ यथाद्यसमरेकर्णंहनिष्यामिहतोपिवा महीतलेपति
ष्यामिसत्येनायुधमालभे २२ एवमाभाष्यराजानमब्रवीन्माधवंवचः अद्यकर्णंरणेकृष्णसूदयिष्येनसंशयः २३ तवबुध्याहि द्रंतेव
धस्तस्यदुरात्मनः एवमुक्तोब्रवीत्पार्थंकेशवोराजसत्तम २४ शक्तोसिभरतश्रेष्ठहंतुंकर्णंमहाबलं एषचापिहिमेकामोनित्यमेव
महारथ २५ कथंभवान्रणेवीरंनिहन्यादितिसत्तमः भूयश्चोवाचमतिमान्माधवोधर्मनंदनं २६ युधिष्ठिरेमंबीभत्सुंत्वंसांत्वयि
तुमर्हसि अनुज्ञातुंचकर्णस्यवधायाद्यदुरात्मनः २७ श्रुत्वाह्यहमयंचैवत्वांकर्णशरपीडितं प्रवृत्तिंज्ञातुमायाताविहावांपांडुनंद
न २८ दिष्ट्यासिराजन्नहतोदिष्ट्यानग्रहणंततः परिसांत्वयबीभत्सुंजयमाशाधिचानघ २९ ॥ ॥ ॥

३० ३१ ३२ ३३ ३४ ३५ ३७ ३८ ३९ ४० एकसप्ततितमः ॥ ॥

युधिष्ठिरउवाच एह्येहि पार्थबीभत्सोमांपरिष्वजपांडव वक्तव्यमुक्तोसिहितंत्वयाक्षांतंचतन्मया अहंत्वामनुजानामिजहि
कर्णंधनंजय मन्युंचमाकृथाःपार्थयन्मयोक्तोसिदारुणं ३१ संजयउवाच ततोधनंजयोराजन्शिरसाप्रणतस्तदा पादौज
ग्राहपाणिभ्यांभ्रातुर्ज्येष्ठस्यमारिष ३२ समुत्थाप्यततोराजापरिष्वज्यचपीडितं मूर्ध्न्युपाघ्रायचैवेनमिदंपुनरुवाचह ३३ धनं
जयमहाबाहोमानितोस्मिदृढंत्वया माहात्म्यंविजयंचैवभूयःप्राप्नुहिशाश्वतं ३४ अर्जुनउवाच अद्यतंपापकर्माणंसा
नुबंधंरणेशरैः नयाम्यंतंसमासाद्यराधेयंबलगर्वितं ३५ येनत्वंपीडितोबाणैर्दृढमायम्यकार्मुकं तस्याद्यकर्मणःकर्णःफ
लमाप्स्यतिदारुणं अद्यत्वामनुपश्यामिकर्णंहत्वामहीपते सभाजयितुमाक्रंदादितिसत्यंब्रवीमिते ३६ नाहत्वाविनिवर्त्ति
ष्येकर्णमद्यरणाजिरात इतिसत्येनतेपादौस्पृशामिजगतीपते ३८ प्रयाहिरथंहिंचदिशंतुदेवतापप्याहमिच्छामितवॉत
नया प्रयाहिशीघ्रंजहिकर्णमाहवेपुरंदरोवृत्रमिवात्मवृद्धये ३९ इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांकर्णपर्वणि

श्रीलक्ष्मापनमः ॥

प्रसाद्य १ २ ३ ४ ५ ६ ७ ८ ९ १४

संजयउवाच प्रसाद्यधर्मराजानंप्रहृष्टेनांतरात्मना पार्थःप्रोवाचगोविंदंसूतपुत्रवधोद्यतः १ कल्पतांमेरथोभूयोयुज्यंतांचह
योत्तमाः आयुधानिचसर्वाणिसज्जंतांमेमहारथे २ उपावृत्तास्तुरगाःशिक्षितास्त्वश्वसादिभिः रथोपकरणैःसज्जाउ
पायांतुत्वरान्विताः ३ यथाहिशीघ्रंगोविंदसूतपुत्रजिघांसया एवमुक्तोमहाराजफाल्गुनेनमहात्मना ४ उवाचदारु
कंकृष्णःकुरुसर्वंयथाब्रवीत् अर्जुनोभरतश्रेष्ठःश्रेष्ठःसर्वधनुष्मतां ५ आज्ञप्तस्त्वथकृष्णेनदारुकोराजसत्तम योजया
मासस रथंवैयाघ्रंशत्रुतापनं ६ सज्जंनिवेदयामासपांडवस्यमहात्मनः युक्तंतु रथंदृष्ट्वादारुकेणमहात्मना ७
आपृच्छ्यधर्मराजानंब्राह्मणान्स्वस्तिवाच्यच समंगलस्वस्त्ययनमारुरोहरथोत्तमं ८ तस्यराजामहाप्राज्ञोधर्मराजोयुधि
ष्ठिरः आशिषोयुंक्तसततःप्रायात्कर्णरथंप्रति ९ तमायांतंमहेष्वासंदृष्ट्वाभूतानिभारत निहतंमेनिरेकर्णंपांडवेनम
हात्मनः १० बभूवुर्विमलाःसर्वादिशोराजन्समंततः चाषाश्चशतपत्राश्चक्रौंचाश्चैवजनेश्वर ११ प्रदक्षिणमकुर्वंत
तदावैपांडुनंदनं बहवःपक्षिणोराजन्पुन्नामानःशुभाःशिवाः १२ त्वरयंतोर्जुनंयुद्धेहृष्टरूपाववाशिरे कंकागृध्रावका
श्येनावायसाश्चविशांपते १४

अगृतस्तस्यगंधंतिमांसहेतोर्भयानकाः निमित्तानिवधन्यानिपार्थिवस्यप्रशंसिरे १४ विनाशमरिसैन्यानांकर्णस्यचवधंप्रतिप्र
यातस्यापपार्थस्यमहान्खेदोव्यजायत १५ चिंताचविपुलाजज्ञेकथंचेदंभविष्यति ततोगांडीवधन्वानमब्रवीन्मधुसूदनः १६
दृष्ट्वापार्थंतथायांतंचिंतापरिगतंतदा वासुदेवउवाच गांडीवधन्वंसंग्रामेयेत्वयाधनुषाजिताः १७ नतेषांमानुषोजेतात्वदन्यइ
हविद्यते दृष्टाहिबहवःशूराःशक्रतुल्यपराक्रमाः त्वांप्राप्यसमरेशूरायेगताःपरमांगतिं १८ कोहिद्रोणंचभीष्मंचभगदत्तंच
मारिष विंदानुविंदावावंत्यौकांबोजंचसुदक्षिणं १९ श्रुतायुषंमहावीर्यमच्युतायुषमेवच प्रत्युद्गम्यभवेत्क्षेमंयोनस्यात्वमिव
प्रभो २० तवह्यस्त्राणिदिव्यानिलाघवंबलमेवच असंमोहश्चयुद्धेषुविज्ञानस्यचसंततिः २१ वेधःपातश्चलक्षेषुयोगश्चै
वतवार्जुन भवान्देवान्सगंधर्वान्हन्यात्सहचराचरान् २२ पृथिव्यांतुरणेपार्थनयोद्धात्वत्समःपुमान् धनुर्ग्राहाहियेकेचित्क्ष
त्रियायुद्धदुर्मदाः २३ आदेवात्वत्समंतेषांनपश्यामिश्रृणोमिच ब्रह्मणाचप्रजाःसृष्टागांडीवंचमहद्धनुः २४ येनत्वंयुध्यसे
पार्थतस्मान्नास्तित्वयासमः अवश्यंतुमयावाच्यंयत्पथ्यंतवपांडव २५ मावमंस्थामहाबाहोकर्णमाहवशोभिनं कर्णोहिबलवा
न्दृप्तःकृतास्त्रश्चमहारथः २६

अ॰ रत्निरित्यस्य विवरणं महाबाहुर्व्यूढोरस्कश्चेति तथा हि स्वस्व पुरुषस्य व्याममात्रं दैर्घ्यं तच्च पंचहस्तं विंशत्यधिकशतांगुलं पुलिस्त्वेकविंशत्यंगुलः अष्टानामरत्नीनां व्याम धिकं शतं अंगुलानि व्याममवेनि आजानुबाहुः पुरुषस्य व्यामं अष्टरत्निमितं भवति अष्टावलारिंशदंगुलानि तत्र वृद्धिः तत्रापि पंचमांशेन वक्षसि विशालता शेषं अंसप्रादाहस्य बाह्वोर्हि रि

कृती च चित्रयोधी च देशकालस्य कोविदः बहुनात्र किमुक्तेन संक्षेपात्कुरु पांडव २७ त्वत्समं तत्त्व हि शिष्टं वा कर्णं मन्ये महार
थं परमं यत्नमास्थाय त्वया वध्यो महाहवे २८ तेजसा वह्निसदृशो वायुवेगसमो जवे अंतकप्रतिमः क्रोधे सिंहसंहननो बली
२९ अष्टरत्निर्महाबाहुर्व्यूढोरस्कः सुदुर्जयः अभिमानी च शूरश्च प्रवीरः प्रियदर्शनः ३० सर्वयोधगुणैर्युक्तो मित्राणामभयंक
रः सततं पांडवद्वेषी धार्तराष्ट्रहिते रतः ३१ सर्वैरवध्यो राधेयो देवैरपि सवासवैः ऋते त्वामिति मे बुद्धिस्त्वमद्य जहि सूतजं ३२ देवै
रपि हि संपन्नैर्बिभ्रद्भिर्मांसशोणितं अशक्यः समरे जेतुं सर्वैरपि युयुत्सुभिः ३३ दुरात्मानं पापवृत्तं नृशंसं दुष्टप्रज्ञं पांडवेयेषु नि
त्यं हीनस्वार्थं पांडवेयैर्विरोधे हत्वा कर्णं निश्चितार्थो भवाद्य ३४ निष्कालिकं कालवशं नयाद्य सदावजानाति हि पांडुपुत्रान् तं
सूतपुत्रं रथिनां वरिष्ठं हत्वाद्य प्रीतिं धर्मराज्ञे कुरुष्व ३५ जानामि ते पार्थ वीर्यं यथावद्दुर्वारणीयं च सुरासुरैश्च सदावजानाति हि पां
डुपुत्रान्मौढ्यात्सूतपुत्रो दुरात्मा ३६ आत्मानं मन्यते वीर्येण पापः सुयोधनः तमद्य मूलं पापानां जहि सौतिं धनंजय ३७ ॥ ॥

त्रिष्टुभ ३० ३३ ३४ निष्कालिकं निर्गतः कालयितास्मेतात्तां ॥ ३५ ३६ ३७ ॥ ॥

५३

एम०

क० १५४

३८ ३९ ४० द्वासप्तति ततः १ २ ३ ४ ५ ७ ८ ९ १० १२
ग२

खकुजिह्वंचतुरास्यंशरदंष्ट्रंतरस्विनं हंसंपुरुषशार्दूलंजहिकर्णंधनंजय ३८ अहंत्वामनुजानामिवीर्येणचबलेनच जहिकर्णंरणे
शूरंमातंगमिवकेसरी ३९ यस्यवीर्येणवीर्यंतेधार्त्तराष्ट्रोवमन्यते तमद्यपार्थसंग्रामेकर्णंवैकर्त्तनंजहि ४० इतिश्रीमहाभारतेक
र्णपर्वणि संजयउवाच ततःपुनरमेयात्माकेशवोर्जुनमब्रवीत् कृतसंकल्पमायांतंवधेकर्णस्यभारत १ अद्यसप्तदशा
हानिवर्त्तमानस्यभारत विनाशस्यातिघोरस्यनरवारणवाजिनां २ भूत्वाहिविपुलासेनातावकानांपरैःसह अन्योन्यंसमरंप्रा
प्यकिंचिच्छेषाविशांपते ३ भूत्वावैकौरवाःपार्थप्रभूतगजवाजिनः त्वांवैशत्रुंसमासाद्यविनष्टारणमूर्धनि ४ एतेतेपृथिवी
पालाः सृंजयाश्चसमागताः त्वांसमासाद्यदुर्धर्षंपांडवाश्चव्यवस्थिताः ५ पांचालैःपांडवैर्मत्स्यैःकारुषैश्चेदिभिःसह त्वयागुप्तै
रमित्रघ्नैः कृतःशत्रुगणक्षयः ६ कोहिशक्तोरणेजेतुंकौरवांस्तातसंयुगे अन्यत्रपांडवात्युद्धेत्वयागुप्तान्महारथान् ७ शक्तस्त्वं
हिरणेजेतुंससुरासुरमानुषान् त्रींल्लोकान्समरेयुक्तान्किंपुनःकौरवंबलं ८ भगदत्तंचराजानंकोन्यःशक्तस्त्वयाविना जेतुंपु
रुषशार्दूलयोपिस्याद्वासवोपमः ९ तथेमांविपुलांसेनांगुप्तांपार्थत्वयानघ नशेकुःपार्थिवाःसर्वेचक्षुर्भिरपिवीक्षितुं १०
तथैवसततंपार्थरक्षिताभ्यांत्वयारणे धृष्टद्युम्नशिखंडिभ्यांभीष्मद्रोणौनिपातितौ कोहिशक्तोरणेपार्थभरतानांमहारथौ भी
ष्मद्रोणौयुधाजेतुंशक्रतुल्यपराक्रमौ कोहिशांतनवंभीष्मंद्रोणंवैकर्त्तनंकृपं द्रौणिंचसौमदत्तिंचकृतवर्माणमेवच १२ ॥

ग्रम० १५५

निव१

१६ १७ १८ १९ २० २१ २२ यदित्वंत्रातानमवेत्ताहिंवात्तेराछ्वलंकोनुप्रर्त्तिपारितिसंवंधः २३ २४ २५ २६

सैंधवंमद्रराज्ञानंराजानंचसुयोधनं वीरान्कृतास्त्वान्समरेसर्वानिर्वर्त्तिनः १४ अक्षौहिणीपतीनुग्रान्संहृतान्सुहृदुर्मदान् त्वामृते
पुरुषव्याघ्रजेतुंशक्तः क्षमानिह १५ श्वेरपक्ष्ववृकुलाः क्रोशाः प्रदीराश्चरथद्विपाः नानाजनपदाश्चोग्राः क्षत्रियाणाममर्षिणां १६ त३
गोवासदासमीपानांवशातीनांचभारत प्राच्यानांवाटधानानांभोजानांचाभिमानिनां १७ उदीराश्चगजासेनाश्चाप्तकर्कस्यभारत त्वां
समासाद्यनिधनंगताभीमंचभारत १८ अथाश्चभीमकर्माणस्तुषारायवनाः खशाः दर्वाभिसारादरदाः शकामाठरतंगणाः १९ अं
ध्रकाश्चपुलिंदाश्चकिराताश्चोग्रविक्रमाः म्लेच्छाश्चपार्वतीयाश्चसागरानूपवासिनः २० संरंभिणोयुद्धशौंडाबलिनोदृंडपाणयः एतेसु
योधनस्यार्थेसंरब्धाः कुरुभिः सह २१ नशक्यायुधिनिर्जेतुंत्वदन्येनपरंतप धार्त्तराष्ट्रमुदग्रंहिव्यूढंदृष्ट्वामहद्बलं २२ यत्त्वंतनभवेस्त्राता
प्रतीयात्कोनुमानवः तत्सागरमिवोद्धूतंरजसासंवृतंबलं २३ विदार्यपांडवैंकुद्धैस्त्वयागुप्तैर्हतंविभो मागधानामधिपतिर्जयत्से
नोमहाबलः २४ अद्यसखैवबाहानिहतः संख्येभिमन्युना ततोदशसहस्राणिगजानांभीमकर्मणां २५ जघानगदयाभीमेनसएन
न्यः परिच्छेदं नत्तोन्येभिहतानागाश्चशतशोबलात २६ ॥ ॥ ॥ ०

सं ३

नथां१

तदेवंसमरेपार्थवर्त्तमानेमहाभये भीमसेनंसमासाद्यन्तांचपांडवकौरवाः २७ सवाजिरथमातंगामृत्युलोकमितोगताः तथासेनामुखेतत्रनिह
तेपार्थपांडवैः २८ भीष्मःप्रोत्सृजद्युगाणिशरजालानिमारिष सचेदिकाशिपांचालान्करूषान्मत्स्यकैंयान २९ शरैःप्रच्छाद्यनिधनमनय
त्परमास्त्रवित तस्यचापच्युतैर्वीरैः परदेहविदारणैः ३० पूर्णमाकाशमभवद्रुक्मपुंखैरजिह्मगैः हत्वाद्ययसहस्राणिरथकेकैवमुष्टिना
३१ लक्षंनरद्विपान्हत्वासमेतान्समहाबलान् ग्रासादशमातंगात्वाजघ्नुर्वाजिरथद्विपान ३२ हित्वानवगतीर्दुष्टाः सवाणानाहवेत्यजन
दिनानिदशभीष्मेणनिघ्नताताववकंवलं ३३ भूत्पाःशतनमथोपस्थाहतास्त्वगजवाजिनः दर्शयित्वात्मनोरूपंरुद्रोपेंद्रसमंयुधि ३४ पांड
वानामनीकानिप्रगृह्यप्रेक्ष्यशातयत विनिघ्नन्पृथिवीपालांश्चेदिपांचालकेकयान ३५ अदहत्पांडवींसेनांरथाश्वगजसंकुलां मज्जं
तमप्लवेमंदमुज्जिहीर्षुः सुयोधनं ३६ तथाचरंतंसमरेतपंतमिवभास्करं यदाहतिकोटिसहस्राः प्रवराणुधपाणापः ३७ नशेकुःसंजया
द्रष्टुंतथैवान्येमहीक्षितः विचरंतंतथातंतुसंग्रामेजितकाशिनं ३८ सर्वौघमेननमहतापांडवान्समभिद्रवत ससुविद्राव्यसमरेपांडवान्सं
जयानपि ॥ ३९

४९ त्वां हि तिक्ष्णेन संबंधमस्मीकर्तुं समर्थ त्वां प्राप्य एकाहान्नश्यमानं कृत्स्नं युक्तं बलवत्तां मन्ये यं जानीषे कृष्णेन नाशयमपि पूर्णो काहयर्यंतं स्थापयित्वा ५१ ॥ ॥ ७

हा

एक एव रणे भीष्म एकवीरत्वमागतः तेन शिखंडीनमासाद्य त्वया पार्थ ससोमकैर्वृतं ४० जघान पुरुषव्याघ्रं शरैः सन्नतपर्वभिः सपक्षपतितः
शेते शरतल्पे पितामहः ४१ त्वां प्राप्य पुरुषव्याघ्रं कृत्त्रः प्राप्येव वासवं द्रोणः पंच हिनान्युग्रो विधम्य रिपुवाहिनीं ४२ कृत्वा व्यूहम
भेद्यं च पातित्वा महारथान् जयद्रथस्य मोक्षं कृत्वा रक्षां महारथः ४३ अंतकप्रतिमः श्रीयो रात्रियुद्धे दहत्सृजाः दग्धा यो वाद्धरे
वीर्यसारे हतोजः प्रतापवान् ४४ धृष्टद्युम्नं समासाद्य सगतः परमां गतिं यद्विवाद्यमवान् युद्धे सूतपुत्रमुखान् रथान् ४५ नावारयिष्य
स्संग्रामे न स्म द्रोणोप्यनं स्मृत भवता तु बलं सर्वं धार्तराष्ट्रस्य वारितं ४६ ततो द्रोणो हतो युद्धे पार्षतेन धनंजय एवं वा को रणे कुर्याति
ह [illegible] कृतिर्यो युधि ४७ यादृशं ते कृतं पार्थ जयद्रथवधं प्रति निवार्य सेनां महतीं हत्वा शूरांश्च पार्थिवान् ४८ निहतः सैंधवो राजा
तर
त्वया स्वबलतेजसा आश्चर्यं सिंधुराजस्य वधं जानंति पार्थिवाः ४९ अनाश्चर्यं हि तत्त्वत्तस्त्वं हि पार्थ महारथः त्वां हि प्राप्य रणे
क्षत्रमेकाहाद्धिति भारत ५० नश्यमानमहं युक्तं मन्येयमिति मे मतिः सेयं पार्थ चमूर्घोरा धार्तराष्ट्रस्य संयुगे ५१ ॥ ॥

नन्याब्र३

क० १५६

हतसर्वेत्त्ववीराह्हिभीष्मद्रोणोपराहतौ शीर्णिद्रवरयोधाश्चहतवाजिरथद्विपा ५२ हीनासूर्येंदुनक्षत्रैर्द्यौरिवाभातिभारती विध्वस्ताहिरणोपार्थेने
नेयंभीमविक्रम ५३ आसरीववुरासेनाशक्रस्येवपराक्रमैः तेषांहतावशिष्टास्तुसंतिपंचमहारथाः ५४ अश्वत्थामाकृतवर्मीकर्णोमद्राधिपः
कृपः तांस्त्वमद्यहत्वापंचमहारथान् हतामित्रःप्रयछोर्वीराज्ञेसद्वीपपत्तनां साकाशजलपातालांसपर्वतमहावनां प्रामोत्त्वमितवीर्यश्री
रथपार्थोवसुंधरां ५५ एतान्पुराविष्णुरिवहत्वादैतेयदानवान् प्रयछमेदिनीराज्ञेशक्रायेवहरिर्यथा ५६ अद्यमोदंतुपांचालानिहतेषुरि
पुत्वया विष्णुनानिहतेष्वेवदानवेयेषुदेवताः ५७ यदिवाद्विपदांश्रेष्ठद्रोणंमानयतोगुरुं अश्वत्थाम्निकृपाचेतेत्तिकृपेचाचार्यगौरवान्
५८ अत्यंतापचितान्बंधून्मानयन्ज्ञातिवांधवान् कृतवर्माणमासाद्यननेष्यसियमक्षयं ५९ भ्रातरंमातुरासाद्यशल्यंमद्रजनाधिपं यदि
त्वमरविंदाक्षदयावान्नजिघांससि ६० इमंपापमतिंक्षुद्रमत्यंतंपांडवान्प्रति कर्णम[illegible]द्यनरश्रेष्ठजह्याशुनिशितैःशरैः ६१ एतत्तेसुकृतंकर्म
नात्रकिंचनयुज्यते वयमप्यनुजानीमोनात्रदोषोस्तिकश्चन दहनेयस्सपुत्रायानिशिमातृसहानघ द्यूतार्थेयच्चपुष्मासुप्रावर्ततसुयोध
नः श्रीरामायनमः श्रीकृष्णायनमः श्रीरामनामतारकं॥ राम ॥ ॥ ॥ ॥

राम० १५१

तस्यसर्वस्यदुष्टात्माकर्णोवैमूलमित्युत कर्णोहिमन्यतेत्राणंनित्यमेवसुयोधनः ६४ ततोमामपिसंरब्धोनिगृहीतंप्रचक्रमे स्थिरावु
द्धिर्नरेंद्रस्यधार्त्तराष्ट्रस्यमानद ६५ कर्णः पार्थान्रणेसर्वान्विजेष्यतिनसंशयः कर्णमाश्रित्यकौंतेयधार्त्तराष्ट्रेणविग्रहः ६६ रोचितोभवता
सार्द्धंजानतापिबलंतव कर्णोहिभाषतेनित्यमहंपार्थान्समागतान् ६७ वासुदेवंचदाशार्हंविजेष्यामिमहारथं प्रोत्साहयन्दुरात्मानंधार्त्त
राष्ट्रंसुदुर्मतिं ६८ समितौगर्जतेकर्णस्तमद्यजहिभारत यच्चयुष्मास्वपापंवैधार्त्तराष्ट्रःप्रयुक्तवान् ६९ तत्रसर्वत्रदुष्टात्माकर्णःपापमति
र्मुखं यच्चतद्धार्त्तराष्ट्रस्यक्रूरैः षड्भिर्महारथैः ७० अपश्यन्निहतंवीरंसौभद्रमृषभेक्षणं द्रोणद्रौणिकृपान्वीरान्कंपयंतंनरर्षभान् ७१ निर्म
नुष्यांश्चगांडीविन्विरथांश्चमहाभयान् व्यश्वारोहांश्चनगान्पत्तीन्प्रायुधजीविनः ७२ कुर्वंतमृषभस्कंधंकुरुवृष्णियशस्करं विधमंतमनी
कानिव्यथयंतंमहारथान् ७३ मनुष्यवाजिमातंगान्प्राहिणोद्यमक्षयं शरैः सौभद्रमायांतंदहंतमिववाहिनीं ७४ तमहंधार्त्तराष्ट्राणां
क्रूरैः षड्भिर्महारथैः तमपश्यंविनिहतंसौभद्रमृषभेक्षणं तन्मेदहतिगात्राणिसत्यमेतेनतेशपे यत्रचापितदुष्टात्माकर्णोभ्यद्रुह्यतप्रभो ७५

ना २

अशक्नुवंश्चाभिमन्योः कर्णस्थातुं रणाजिरे सौभद्रशरनिर्भिन्नो विसंज्ञः शोणितोक्षितः ७६ निश्वसन्क्रोधसंरब्धो विमुखः सायकार्दितः अ
पयानकृतोत्साहो निराशश्चापि जीविते ७७ ततः सैन्यमभूद्विक्लवः संख्ये प्रहारजनितश्रमः अथ द्रोणस्य समरे तत्कालसदृशं तदा ७८ श्रुत्वा क
र्णो वचः क्रूरं ततश्चिच्छेद कार्मुकं ततश्छिन्नायुधं तेन रणे पंच महारथाः ७९ नचैव निकृतिप्रज्ञाः प्राहरंश्छरवृष्टिभिः तस्मिंस्तु निहते वी
रे सर्वेषां दुःखमाविशत् ८० प्राहसत्सूतपुत्रश्च कर्णः सच सुयोधनः यच्च कर्णोऽब्रवीत्कृष्णां सभायां परुषं वचः ८१ प्रमुखे पांडवेयानां
कुरूणां च नृशंसवत् विनष्टाः पांडवाः कृष्णे शाश्वतं नरकं गताः ८२ पतिमन्यं पृथुश्रोणि वृणीष्व मृदुभाषिणि एषा त्वं धृतराष्ट्रस्य दासी
भूता निवेशनं ८३ प्रविशारालपक्ष्माक्षि न संति पतयस्तव इत्युक्तवानधर्मज्ञस्तदा परमदुर्मतिः ८४ पापः पापं वचः कर्णः शृण्वतस्ते
च भारत अस्य पापस्य तद्वाक्यं स्वर्णविकृताः शराः ८५ शमयंतु शिलाधौता रत्नयास्तां जीवितच्छिदः यानि चान्यानि दुष्टात्मा पापानि
कृतवांस्त्वयि ८६ तान्यद्य जीवितं चास्य शमयंतु शरास्तव गांडीवप्रहितान्घोरानद्य गात्रैः स्पृशन्तुरात ॥ ॥ ॥

८१ ८१ ८१ ८१ ॥ ॥ ॥ ॥ ॥ ८

५३

करीः स्मरन्तु शान्त्वा च वचनं द्रोणभीष्मयोः स्वर्णपुंखाश्च नाराचाः शत्रुघ्ना वैद्युतप्रभाः ८८ त्वयास्ताः स्तनस्त्वमारिणि भित्त्वा पापाः संतिशो
णितं उग्रास्त्वद्भुजनिर्मुक्ता मर्मभित्ता महाशराः ८९ अयुधकरीं महावेगाः पेक्रूपं त्वत्पमहाय्यं अघहाहाहन्त नारीणां विषणास्त्वच्छर
दिताः ९० प्रयान्तेनेरथात्करीपिश्यंत्व वसुधाधिपाः अपशोणितं संमग्नेशयाने पतितं भुवि अपविद्धायुधं करीं दीनाः पश्यन्त्वबांधवाः
९१ हस्तिकक्षोमहानस्पमहन्त्वेनोन्मथितस्त्वया प्रकंपमानः पतनभूमावपि रथध्वजः ९२ त्वयाशरशतैश्छिन्नं रथे हेमविभूषितं ह
तयोधाश्चमुक्तन्त्रभीतः शल्यः पलायन्तां ९३ ततः सयोधनो दृष्ट्वा हतमाधिरथिं त्वया निराशो जीविते त्वत्र राज्ये चैव भवत्वरिः ९४ प
तन्तु वंति पांचाला वध्यमानाः शितैः शरैः करीनि भरतश्रेष्ठ पांस्त्वानुज्जिहीर्षवः ९५ पांचाला द्रौपदेयाश्च धृष्टद्युम्न शिखंडिनौ धृष्टद्यु
म्नतनजाः श्चशतानीकं चनाकुलिं ९६ नकुलं सहदेवं च दुर्मुखं जनमेजयं सुधर्माणं सात्यकिं च विद्धि कर्णवशंगतान् ९७ अभ्याहतानां कर्णे
न पांचालानां महौरणो श्रूयते निस्वनो घोरस्त्वद्बन्धूनां परंतप ९८ न त्वेव भीताः पांचालाः कथंचित्स्युः पराङ्मुखाः नहि मृत्युं महेष्वासा गणा
यंति महारणे ९९ ॥ ॥

ग्रा ४ यु ५

क॰ १५२

युत्कः पांडवीसेनां शरौघैः समवेष्टयत् तेसमासाद्यपांचालाभीष्माज्ञामसमराङ्मुखाः १०० तथाज्वलंतमस्त्राग्निंगुरुंसर्वधनुष्मतां
निर्दहंतंचसमरेदुर्धर्षंद्रोणमोजसा १ तेनित्यमुदिताजेतुंमृधेशत्रूनरिंदम नजात्वाधिरथेभीताः पांचालास्युःपराङ्मुखाः २
तेषामापततांशूरःपांचालानांतरस्विनां आदास्यतिशरैःकर्णःपतंगानामिवानलः ३ तांस्तथाभिमुखान्वीरान्मित्रार्थेत्यक्तजी
वितान् क्षयंनयतिराधेयः पांचालाञ्छतशोरणे ४ तद्भारतमहेष्वासानगाधेमज्जतोप्लवे कर्णमेवाप्लवोभूत्वापांचालांस्त्रातुमर्हसि
५ अस्त्रंहिरामात्कर्णेनभार्गवादृषिसत्तमात् यदुपात्तंमहाघोरंतस्यरूपमुदीर्यते ६ तापनंसर्वसैन्यानांघोररूपंसुदारुणं समावृत्य
महासेनांज्वलितंस्वेनतेजसा ७ एतेचरंतिसंग्रामेकर्णचापच्युताःशराः भ्रमराणामिवव्राताःस्तापयंतिस्मतावकान् ८ एतेद्रवंतिपां
चालाःदिक्षुसर्वासुभारत कर्णास्त्रंसमरेप्राप्यदुर्निवार्यमनात्मभिः ९ एषभीमोदृढक्रोधोवृतःपार्थसमंततः संजयैर्योधयन्कर्णंपी
ड्यतेनिशितैःशरैः १० पांडवान्संजयांश्चैवपांचालांश्चैवभारतः हन्यादुपेक्षितःकर्णोरोगोदेहमिवागतः ११

एम॰ १५८

१२ १३ १४ १५ त्रिसप्ततिः १ २ ३ ४ ५ त्वलेनंपुरस्तमार्षे ६ ७ ८

नान्यंत्वत्तोहिपश्यामियोधंयौधिष्ठिरेबले यःसमासाधराधेयंस्वस्तिमानाव्रजेद्गृहं १२ तमघनिशितैर्वाणैर्विनिहत्यनरर्षभ य
थावतिंत्वंपार्थकृत्वाकीर्तिमवाप्नुहि १३ त्वंहिशक्तोरणेजेतुंसकर्णानपिकौरवान् नान्योयुधियुधांश्रेष्ठसत्यमेतद्ब्रवीमिते १४
एतत्कृत्वामहत्कर्महत्वाकर्णंमहारथं कृतार्थःसफलःपार्थसुखीभवनरोत्तम १५ इतिश्रीमहाभारतेकर्णपर्वणि संजयउवाच
सकेशवस्यबीभत्सुःश्रुत्वाभारतभाषितं विशोकःसंप्रहृष्टश्चक्षणेनसमपद्यत १ ततोज्यामभिमृज्याशुव्याक्षिपद्गांडिवंधनुः दध्रेक
र्णविनाशायकेशवंचाभ्यभाषत २ त्वयानाथेनगोविंदध्रुवएवजयोमम प्रसन्नोयस्यमेद्यत्वंलोकेभूतभविष्यकृत ३ त्वत्सहायोह्यहं
कृष्णत्रीन्लोकान्वैसमागतान् प्रापयेयंपरंलोकंकिमुकर्णंमहाहवे ४ पश्यामिद्रवतींसेनांपांचालानांजनार्दन पश्यामिकर्णंसम
रेविचरंतमभीतवत् ५ भार्गवास्त्रंचपश्यामिज्वलंतंकृष्णसर्वशः सृष्टंकर्णेनवार्ष्णेयशक्रेणेवयथाशनिं ६ अयंखलुससंग्रामो
यत्रकर्णंमयाहतं कथयिष्यंतिभूतानियावद्भूमिर्धरिष्यति ७ अद्यकृष्णविकर्णामेकर्णंनेष्यंतिमृत्यवे गांडीवमुक्ताःक्षिण्वंतोमम
हस्तप्रचोदिताः ८ ॥ ॥ ॥ ॥ ॥

क० ९ १० ११ स्मातांस्माराद १२ मंडलंछत्रेशारीरस्थापनपदं दुरोदरं १३ १४ १५ १६ १७ १८ १९ २०

१५९

अथ राजा धृतराष्ट्रस्तां बुद्धिमवमंस्यते दुर्योधनमराज्यार्हं यथा राज्येऽभ्यषिंचयत ८ अथ राज्यस्तु वाह्येव श्रियो राष्ट्रान्तथा पुरात ७
ते भ्यस्त्वमहाबाहो धृतराष्ट्रो विमोक्ष्यति १० अथ दुर्योधनो राज्याज्जीविताच्च निराशकः भविष्यति हते कर्णे कृष्णमेतं ब्रवीमि ते ११ अ
यद्दृष्टा मया कर्णं शरैर्विशकलीकृतं स्मारितं तव वाक्यं निशम्य वदति जनेश्वर १२ अथ मामौ सौबलः कृष्ण स्नेहान्नानादवैशराण दुरो
दरं च गांडीवं मंडलं च रथं मम १३ अथ कुंती स्तनस्याहं हंआत्तः प्रजागरं व्यपनेष्यामि गोविंद हत्वा कर्णं शितैः शरैः १४ अथ कुंतीसु
तो राजा हते सूतसुते मया सुप्रहृष्टमनाः प्रीतश्चिरं सुखमवाप्स्यति १५ अथ चाहमनाधृष्यं केशवाप्रतिमं शरं उत्स्रक्ष्यामीह यः क
र्णं जीविताद्भ्रंशयिष्यति १६ यस्य चैतद्व्रतं मह्यं वधे किल दुरात्मनः पादौ न धावये तावद्यावद्धन्यां न फाल्गुनं १७ मृषा कृत्वा व्रतं त
स्य पापस्य मधुसूदन पातयिष्ये रथात्कायं शरैः सन्नतपर्वभिः १८ योऽसौ रणे नरं नान्यं पृथिव्यामनुमन्यते तस्याद्य सूतपुत्रस्य भूमिः पा
स्यति शोणितं १९ अपि तिर्यस्मि कृष्णेति सूतपुत्रोपदाब्रवीत धृतराष्ट्रमतेः कर्णः श्लाघमानः स्वकान्गुणान २० ॥ ॥

रा०
१५९

अनृतं तत्करिष्यंति मामका निशिता: शरा: आशीविषा इव क्रुद्धास्तस्य पास्यंति शोणितं २१ मया हस्तवता मुक्ता नाराचा वैद्युतत्विषः गांडी
वसृष्टास्यंति कर्णस्य परमां गतिं २२ अद्य तस्याति राधेयः पांचालीं यत्तदाब्रवीत सभामध्ये वचः क्रूरं कुत्सयन्पांडवान्प्रति २३ ये वै षंढ
तिलास्तत्र भवितारो धृततिला: हते वैकर्त्तने कर्णे सूतपुत्रे दुरात्मनि २४ अहं वः पांडुपुत्रेभ्यस्त्रास्यामीति यदब्रवीत ध नराधृसृतान्कर्णः
श्लाघमानोत्मनो गुणान २५ अनृतं तत्करिष्यंति मामका निशिता: शरा: हंताहं पांडवान्सर्वान्सपुत्रानिति योब्रवीत २६ तमद्य कर्णं
हंतास्मि मिषतां सर्वधन्विनां यस्य वीर्ये समाश्वास्य धार्त्तराष्ट्रो महामनाः अवमन्यत दुर्बुद्धिर्नित्यमस्मान्दुरात्मवान अद्य कर्णे हते क्षुद्रं धार्त्त
राष्ट्राः सराजकाः २८ विद्रवंतु दिशो भीताः सिंहत्रस्ता मृगा इव अद्य दुर्योधनो राजा आत्मानं चानुशोचतां २९ हते कर्णे मया संख्ये सपुत्रे
ससुहृज्जने अद्य कर्णं हतं दृष्ट्वा धार्त्तराष्ट्रोत्यमर्षणः ३० जानातु मां रणे कृष्ण प्रवरं सर्वधन्विनां सपुत्रपौत्रे सामात्यं सभृत्यं च निराशिषं
३१ अद्य राज्ये करिष्यामि धृतराष्ट्रं जनेश्वरं अद्य कर्णस्य चक्रांगाः क्रव्यादाश्च पृथग्विधाः ३२ ॥ ॥ ॥

शरैर्भिन्नानि गात्राणि विचरिष्यंति केशव अद्य राधासुतेनाहं संग्रामे मधुसूदन ३३ शिरश्छेत्स्यामि कर्णस्य मिषतां सर्वधन्विनां अद्य ती
क्ष्णैर्विपाठैश्च क्षुरैश्च मधुसूदन ३४ शरैश्छेत्स्यामि गात्राणि राधेयस्य दुरात्मनः अद्य राजा महत्कृच्छ्रं संत्यक्ष्यति युधिष्ठिरः ३५ संतापं मान
सं वीर चिरसंभृतमात्मनः अद्य केशव राधेयमहं हत्वा सबांधवं ३६ नंदयिष्यामि राजानं धर्मपुत्रं युधिष्ठिरं अद्याहमनुगान्कृष्ण कर्णस्य कृप
णान्युधि ३७ हंता ज्वलनसंकाशैः शरैः सर्पविषोपमैः अद्याहं हेमविकचैर्गार्ध्रपत्रैरजिह्मगैः ३८ संस्तरिष्यामि गां वीर वसुधां वसुधाधिपै
: अद्याभिमन्योः शत्रूणां सर्वेषां मधुसूदन ३९ प्रमथिष्यामि गात्राणि शिरांसि च शितैः शरैः अद्य निर्धार्तराष्ट्रां च भ्रातृभिः सहितस्य मे दास्यामि मेदिनीं ४०
निरर्जुनां वा पृथिवीं केशवानुचरिष्यसि अद्याहमनृणः कृष्ण भविष्यामि धनुर्भृतां ४१ कोपस्य च कुरूणां च शराणां गांडिवस्य च अद्य दुः
खमहं मोक्ष्ये त्रयोदशसमार्जितं ४२ हत्वा कर्णं रणे कृष्ण शंबरं मघवानिव अद्य कर्णे हते युद्धे सोमकानां महारथाः ४३ कृतं कार्यं च मन्यंतां मित्रका
र्येप्सवो युधि मम चैव कथं प्रीतिः शैनेयस्याद्य माधव ४४ ॥ ॥ ॥ ॥

श्लो २ मकानां २

४५ ४८ ४९ ५० ५१ चत्वसमाप्तिः १ समागमेकर्णेनसहकीदृक्युद्धमभूदितिशेषः १ भी३

भविष्यतिहतेकर्णेममपिवापितृपाधिके अहंहत्वारणेकर्णंपुत्रंचास्यमहारथं ४५ प्रीतिदास्यामिभीमस्यपमयोः सात्यकस्यच धृष्टद्युम्नशिखंडिभ्यांपांचालानांचमाधव ४६ अद्यघ्नन्तरणेकर्णंमिषामिहत्वाकर्णंमहाहवे अद्यपश्यंतुसंग्रामेधनंजयममर्षिणं ४७ युध्यंतंकौरवान्संख्येपातयंतंचसूतजं भवत्सकाशेवक्ष्येचपुनरेवात्मसंस्तवं ४८ धनुर्वेदेमत्समोनास्तिलोकेपराक्रमेवाममको स्तितुल्यः कोवाप्यन्योमत्समोस्तिक्षमायांतथाक्रोधेसदृशोन्योनमेस्ति ४९ अहंधनुष्मानसुरान्सुरांश्चसर्वाणिभूतानिचसंगता नि स्वबाहुवीर्याद्गमयेयपराभवंमत्पौरुषंविद्धिपरंपरेभ्यः ५० शरार्चिषागांडिवेनाहमेकः सर्वान्कुरून्बाल्हिकांश्चाभिहत्य हिमा त्ययेकक्षगतोयथाग्निस्तथादहेयंसगणान्प्रसह्य ५१ पाणौपृषत्कालिखितामयैतेधनुश्चसव्येविततंसबाणं पादौचमेसरथौसध्व जौचनमादृशंयुद्धगतंजयंति ५२ इत्येवमुक्त्वार्जुनएकवीरः क्षिप्रंरिपुघ्नः क्षतजोपमाक्षः भीमंमुमुक्षुः समरोत्पयातः कर्णस्य कायाच्चशिरोजिहीर्षुः ५३ इतिश्रीमहाभारतेकर्णपर्वणि धृतराष्ट्रउवाच समागमेपांडवसृंजयानांमहाभयेमामकानामगाधे धनंजयेतातरणायपातेकर्णेननयुद्धमथोत्रकीदृक् १ ॥ ॥ ॥ ७

रवि४

संजयउवाच तेषामनीकानिबृहद्ध्वजानि रणेसमृद्धानिसमागतानि गर्जंतिभेरीनिनदोत्सुकानिनिनादैर्यथामेघगणास्तपांते २ म
हागजाभ्राकुलमस्त्रतोयंवादित्रनेमीतलशब्दवत्व हिरण्यचित्रायुधविद्युतंचशरासिनाराचमहास्त्रधारं ३ तद्भीमवेगंरुधिरौघवाहिख
ड्गाकुलंक्षत्रियजीवघाति अनार्तवंक्रूरमनिष्टवर्षंबभूवतत्संहरणंप्रजानां ४ एकंरथंसंपरिवार्यमृत्युंनयंत्यनेकेचरथाःसमेताः ए
कस्तथैकंरथिनंरथाग्र्यस्तथारथश्चापिरथाननेकान ५ रथंससूतंसहयंचकंचित्कश्चिद्रथीमृत्युवशंनिनाय निनायचाप्येकगजेनक
श्चिद्रथान्बहून्मृत्युवशेनथाश्वान ६ रथान्ससूतान्सहयान्गजांश्चसर्वानरीन्मृत्युवशंशरौघैः निन्येहयांश्चैवतथाससादीन्पदातिसंघां
स्तथैवपार्थः ७ कृपःशिखंडीचरणेसमेतौदुर्योधनंसात्यकिरभ्यगच्छत श्रुतश्रवाद्रोणपुत्रेणसार्धंयुधामन्युश्चित्रसेनेनसार्धं ८ कर्णस्य
पुत्रंतुरथीसुषेणंसमागतंसृंजयश्चोत्तमौजाः गांधारराजंसहदेवःक्षुधार्तोमहर्षभंसिंहइवाभ्यधावत ९ शतानीकोनाकुलिःकर्णपुत्रंयु
वानंवृषसेनंशरौघैःसमार्पयत्कर्णपुत्रश्चशूरः पांचालेयंशरवर्षैरनेकैः १० रथर्षभःकृतवर्माणमार्छन्माद्रीपुत्रोनकुलश्चित्रयोधी
पांचालानामधिपोयाज्ञसेनिः सेनापतिःकर्णमार्छत्ससैन्यं

दुःशासनो भारत भारती च संसप्तकानां पृतनाः समृद्धाः भीमं रणे शस्त्रभृतां वरिष्ठं भीमं समार्छन्त महाप्रवेगं १२ कर्णात्मजं तत्र
जघान वीरस्तथा छिन्नध्वजात्तमौजाः प्रसह्य तस्मात्तु मांगं निपपात भूमौ निनादयन्गां निनदेन खंच १३ सुषेणशीर्षं प
तितं पृथिव्यां विलोक्य कर्णोपि पतत्तदार्त्तरूपः क्रोधाद्धयान्सरथध्वजं च बाणैः सुधारैर्निशितैरहंतत १४ स उत्तमौजा निशि
तैः पृषत्कैर्विव्याध खड्गेन च भास्वरेण पार्ष्णिंग्रहांश्चैव कृपस्य हत्वा शिखंडिवाहं स ततोध्यरोहत १५ कृपं तु दृष्ट्वा विरथं
रथस्थो नैच्छच्छरैस्ताडयितुं शिखंडी तं द्रौणिरावार्य रथं कृपस्य समुज्जह्रे पंकगतां यथा गां १६ हिरण्यवर्मा निशितैः पृष
त्कैस्तवात्मजानामनिलात्मजो वै अतापयत्सैन्यमतीव भीमः कालेषु चौघमध्यगतो यथार्कः १७ इति श्रीमहाभारते कर्ण
पर्वणि संजय उवाच अथ त्विदानीं तुमुले विमर्दे द्विषद्भिरेको बहुभिः समावृतः महारणे सारथिमित्युवाच भीमश्च
मूं वाहय धार्त्तराष्ट्रीं १ त्वं सारथे याहि जवेन वाहैर्नयाम्येतान्धार्त्तराष्ट्रान्यमाय संचोदितो भीमसेनेन चैवं स सारथिः पुत्रब
लं त्वदीयं २ प्रायात्ततः सत्वरमुग्रवेगो यतो भीमस्तद्बलं गंतुमैच्छत् ततोपरे नागरथाश्वपत्तिभिः प्रत्युद्ययुस्तं कुरवः समंतात् ३

धा२

क०
१६२

भीमस्यवाहाग्र्यमुदारवेगंसमंततोबाणगणैर्निजघ्नुः ततःशरानापततोमहात्माचिच्छेदबाणैस्तपनीयपुंखैः ४ तेवैनिपेतुस्तपनी
यपुंखाद्विधात्रिधाभीमशरैर्निकृत्ताः ततोराजन्नागरथाश्वसूतंभीमाहतानांवरराजमध्ये ५ घोरोनिनादःप्रबभौनरेंद्रवज्राहताना
मिवपर्वतानां तेवध्यमानास्तुनरेंद्रमुख्यानिर्भिद्यंतोभीमशरप्रवेकैः ६ भीमंसमंतात्समरेसमारोहन्वृक्षंशकुंताइवपुष्पहेतोः ततोभि
पातेनवैसैन्यसभीमःप्रादुश्चक्रेवेगमनंतवेगः ७ यथांतकालेक्षपयन्दिधक्षुर्भूतांतकृत्कालइवात्तदंडः तस्यातिवेगस्यरणेतिवेगंना
शक्नुवन्धारयितुंत्वदीयाः ८ व्यात्ताननस्यापततोयथैवकालस्यकालेहरतःप्रजावै ततोबलंभारतभारतानांप्रदह्यमानंसमरेम
हात्मना ९ भीतंदिशोकीर्यतभीमतुन्नंमहानिलेनाभ्रगणायथैव ततोधीमान्सारथिमब्रवीद्बलीसभीमसेनःपुनरेवहृष्टः १०
सूताभिजानीहिस्वकान्परान्वारथान्ध्वजांश्चापततःसमेतान् युध्यन्नहंनाभिजानामिकिंचिन्मासैन्यंस्वंछादयिष्येपृषत्कैः ११
अरीन्विशोकाभिनिरीक्ष्यसर्वतोरणेध्वजाग्राणिधुनोतिमेभृशं राज्ञातुरोनागमयत्किरीटीबहूनिदुःखान्यभियातोस्मिसूत १२
॥ ॥ श्रीकृष्णायनमः ॥ छ १२ ॥

न९

न३

गम०
१६२

५२

एतद्धुःखं सारथे धर्मराजो यन्मां हित्वा यातवान् शत्रुमध्ये नैनं जीवन्नाद्य जानामि सूत जीवन्वा भीमस्तु वातन्ममाद्याणि दुःखं १३ सो ऽहं द्विषन्तेस्म
मुदग्रकल्पं विनाशयिष्ये परान्समप्रतीतान्ः एतन्निहन्तास्मि जिमध्ये समेतं प्रीतो भविष्यामि महत्वयाद्य १४ सर्वास्तु तूणीर्सायकानामवेक्ष्य किं शिष्टं सा
न्सायकानां रथे मे कावजातिः किं प्रमाणं चेति शोज्ञात्वा व्यक्तं तत्समाचक्ष्व सूत १५ विशोक उवाच षट् मार्गणानामयुतानि वीर क्षुराश्च
भल्लाश्च तथायुतारव्याः नाराचानां द्वे सहस्रे च वीर त्रीण्येव च प्रदराणां स्म पार्थ १६ अस्त्यायुधं पांडवेयावशिष्टं न यद्वहेच्छकटं षड्गवीयं एतद्वि
द्वन्मुंच सहस्रशोपि गदासिबाहुद्रविणं च ते ऽस्ति १७ प्रासाश्च मुद्गराः शक्तयस्तोमराश्च मा भैषीस्त्वं संक्षयादायुधानां १८ भीमसेन उवाच
सूताद्येनं पश्य भीमप्रयुक्तैः संछिन्दद्भिः पार्थिवानां सुवेगैः छन्नं बाणैर्घोररूपं महास्विर्स्मं समस्तुलोके न तुल्यं १९ अद्येवैतद्विदितं पा
र्थिवानां भविष्यति स्याकुमारं च सूत निमग्नो वा समरे भीमसेन एकः कुरून्वा समरे थ्वजेषीत् २० सर्वे संख्ये कुरवो निपतन्तु मा वा लोकाः
कुमारं सर्वानेकस्तान्हपातयिष्ये ते वा सर्वे भीमसेनं तुदन्तु २१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

६३

कीर्तयस्ला २

आशास्तारः कर्मचाप्युत्तमं ये तन्मे देवाः केवलं साधयंतु आपालिहाघार्जुनः शत्रुघाती शक्रस्तूणीयत्नइवोपहूतः २२ इत्येवं तं मारतो दीर्घ
मार्गामेतं कस्मादिदृष्ट्वैवतेनैरेंद्राः मत्तं भीमान्सव्यसाचीनराग्र्यः सैन्यं येनच्छादयत्साशुबाणैः २३ पश्यपश्यध्वजांश्चद्रवंतो विशोकनागान्हया
न्पत्तिसंघांश्च सर्वे रथान्विकीर्णान्पार्थशक्तितारितान्पश्यपिवितान्त्राथिनश्चैवसूत २४ आपूर्यते कौरवी चाप्यभीक्ष्णं सेनाघसौ सुमहाहन्य
माना धनंजयस्याशनितुल्यवेगैर्ग्रस्ता शरैः कांचनबर्हिजालैः २५ एते द्रवंति स्मरथाश्वनागाः पदातिसंघा नतिमर्दयंतः संमुह्यमानाः कौ
रवाः सर्व एव द्रवंति नागा इव दावदग्धभीताः २६ हाहाकृतांश्चैव रणेविशोकमुंचंति नादान्विपुलान्गजेंद्राः २७ विशोक उवाच किं भीमनै
नं त्वमिहाश्रृणोषि विस्फारितं गांडीवस्यातिघोरं क्रुद्धेनपार्थेन विकृष्यमाणं कच्चिन्नमे नवकर्णौ विनष्टौ २८ सर्वेकामाः पांडवेतेसम
द्धाः कपिर्ध्वजोदृश्यतेहस्तिसैन्ये नीलाद्धनाद्विद्युतमुच्चरंतीं तथापश्यविस्फुरंतींधनुर्मे २९ कपिर्ध्वजोवीक्ष्यतेसर्वतोवैध्वजाग्रमारुह्य
धनंजयस्य वित्रासयन्द्विषत्संघानिमैरैविभेम्यस्मादात्मनेवाभिवीक्ष्य ३० ॥ ॥ ॥ ॥ ॥ ॥ ॥॥

३१ ३२ ३३ ३४ ३५ असितप्रयुक्तैः कृष्णप्रयुक्तैः ३६ ३७ ३८ ३९

विभ्राजते चातिमात्रं किरीटं विचित्रमेतत्तु धनंजयस्य दिवाकराभो मणिरेष दिव्यो विभ्राजते चैव किरीटसंस्थः ३१ पार्श्वे भीमं पाण्डुराभ्र
प्रकाशं पश्यस्व शंखं देवदत्तं सुघोषं अभीषुहस्तस्य जनार्दनस्य विगाहमानस्य चमूं परेषां ३२ रविप्रभं वज्रनाभं क्षुरान्तं पार्श्वे स्थितं पश्य
जनार्दनस्य चक्रं यशोवर्द्धनं केशवस्य सदार्चितं यदुभिः पश्य वीर ३३ महाद्विपानां सरलद्रुमोपमाः करा निकृत्ताः प्रपतन्त्यमी क्षुरैः
: किरीटिना तेन पुनः समाहिताः शरैर्निकृत्ताः कुलिशैरिवाद्रयः ३४ तथैव कृष्णस्य च पाञ्चजन्यं महार्हमेतद्द्विजराजवर्णं कौन्तेय प
श्योरसि कौस्तुभं च जाज्वल्यमानं विजयां स्रजं च ३५ ध्रुवं रथाग्र्यः समुपैति पार्थो विद्रावयन्सैन्यमिदं परेषां सिताभ्रवर्णैरसितप्रयु
क्तैर्हयैर्महार्हैः रश्मिनावरिष्ठः ३६ रथान्हयान्पत्तिगणांश्च सायकैर्विदारितान्पश्य पतन्त्यमी पथा तवानुजेनामरराजतेजसा महाव
नानीव सुपर्णवायुना ३७ चतुःशतान्पश्य रथानिमान्हतान्सवाजिसूतान्समरे किरीटिना महेषुभिः समशतानि निहतानि तेनापरा
ति साश्वीश्च रथाननेकशः ३८ अयं समभ्येति तवान्तिकं बली निघ्नन्कुरूंश्चित्ररथ वधे हि अर्जुनः समत्तुकामोसि हतास्तवाहिता बलं तवा

क१ युध्यस्व चिरापवर्द्धितं ३९ ॥ ॥ ॥ ॥ ॥ ॥

५० षट्सप्ततिः श्रुत्वातुरथनिर्घोषमितिसप्ताध्योष्टसप्ततिः १ २ ३ ४ ५ ६ ७ ८

भीमसेनउवाच दशनिर्जित्यामवरांश्चतुर्दशप्रियास्मोनसारथेश्रुमसेनः दासीशतंचापिरथांश्चविंशतिंपरहुनेवेदयसेविशोक ५० ३
तिश्रीमहाभारतेकर्णपर्वणि संजयउवाच श्रुत्वातुरथनिर्घोषंसिंहनादंचसंयुगे अर्जुनः प्राहगोविंदंशीघ्रंनोदयवाजिनः १ अर्जुनस्य
वचः श्रुत्वागोविंदोर्जुनमब्रवीत् एषगच्छामिसुक्षिप्रंयत्रभीमोव्यवस्थितः २ तंयांतमश्वैर्हिमशंखवर्णैः सुवर्णमुक्तामणिजालनद्धैः
जंभंजिघांसुंप्रगृहीतवज्रंजयायदेवेंद्रमिवोग्रमन्युं ३ रथाश्वमातंगपदातिसंघाबाणस्वनैर्नेमिरवखुरस्वनैश्च संनादयंतोवसुधांदिशश्चक्रु
द्धान्नसिंहानृपमसुवीरयत्न् ४ तेषांचपार्थस्यचमारिषासीद्देहासुपापक्षपणंसुयुद्धं त्रैलोक्यहेतोरसुरैर्यथासीद्देवस्यविष्णोर्जयतांवरस्य
५ तैरस्तमुच्चावचमायुधंतदेकः प्रचिच्छेदकिरीटमाली क्षुरार्धचंद्रैर्निशितैश्चभल्लैः शिरांसितेषांबहुधाचबाहून् ६ छत्राणिवालव्यज
नानिकेतून्अश्वान्रथान्पत्तिगणान्द्विपांश्च तेपेतुरुर्व्यांबहुधाविरूपावातप्रभग्नानियथावनानि ७ सुवर्णजालावततामहागजाः
सवैजयंतीध्वजयोधकल्पिताः सुवर्णपुंखैरिषुभिः समाचिताश्चकाशिरेप्रज्वलितायथाचलाः ८ ॥ ॥ ॥ ॥॥

विदार्यनागांश्चरथांश्चधनंजयः शरैस्तैर्मेघवासववज्रसन्निभैः हुतंयथैवोकरोत्तिग्मांसयात्तथायथामकरात्वान्वलितेनवलिंपुरा ९ ततःसपुरुषव्या
घ्रस्तंवैसैन्यमरिंदमः प्रविवेशमहाबाहुर्मकरःसागरंयथा १० तंदृष्ट्वा तावकाराजन्रथपत्तिसमन्विताः गजाश्वसादिबहुलाः पांडवंसमुपाद्रवन् ११
तेषामापततांपार्थमारावःसुमहानभूत् सागरस्येवक्षुब्धस्ययथास्यात्सलिलस्वनः १२ तेतुतंपुरुषव्याघ्रंव्याघ्राइवमहारथाः अभ्यद्रवंतसंग्रामेत्य
क्त्वाप्राणाकृतंभयं १३ तेषामापततांतत्रशरवर्षाणिमुंचतां अर्जुनोव्यधमत्सैन्यंमहावातोघनानिव १४ तेर्जुनंसहिताभूत्वारथवंशैः प्रहारिणः
अभियायमहेष्वासाविव्यधुर्निशितैः शरैः १५ ततोर्जुनःसहस्राणिरथवारणवाजिनां प्रेषयामासविशिखैर्यमस्यसदनंप्रति १६ तेवध्यमा
नाः समरेपार्थचापच्युतैः शरैः तत्रतत्रस्मलीयंतेभयकातेमहारथाः १७ तेषांचतुःशतान्वीरान्यतमानान्महारथान् अर्जुनोनिशितैर्बा
णैरनयद्यमसादनं १८ तेवध्यमानाः समरेनानालिंगैः शितैः शरैः अर्जुनंसमभिसंत्यज्यदुद्रुवुर्वैदिशोदश १९ तेषांशब्दोमहानासीद्द्रवतां
वाहिनीमुखे महौघस्येवजलधेर्गिरिमासाद्यदीर्यतः २० तांतुसेनांभृशंविद्ध्वाद्रावयित्वार्जुनः शरैः प्रायादभिमुखःपार्थः सूतानीकंहिमारि

न्द २

क॰
१६५

तस्यशब्दोमहानासीत्मरणानिम्रुवस्यवै गरुडस्येवपततः पन्नगार्थेयथापुरा २२ तेतुशब्दमभिश्रुत्यभीमसेनोमहाबलः बभूवपरमप्रीतः
पार्थदर्शनलालसः २३ श्रुत्वैवपार्थमायांतंभीमसेनःप्रतापवान् त्यक्त्वाप्राणान्महाराजसेनांतवममर्दह २४ सवायुवीर्यप्रतिमो
वायुवेगसमोजवे वायुवद्व्यचरद्भीमोवायुपु त्रः प्रतापवान्तेनार्द्य मानाराजेंद्रसेनातवविशांपते व्यभ्रश्यतमहाराजभिन्नानौरि
वसागरे २६ तांतुसे नांतदाभीमोदर्शयन्पाणिलाघवं शरैरवचकर्तोग्रैः प्रेषयिष्यन्यमक्षयं २७ तत्रभारतभीमस्यवलंदृष्ट्वाति
मा नुषं व्यत्रसंततयोधाःकालस्येवयुगक्षये २८ तथार्दितान्भीमबलान्भीमसेनेनभारत दृष्ट्वादुर्योधनोराजाइदंवचनम
ब्रवीत् २९ सैनिकान्स्वमहेष्वासान्योधांश्चभरतर्षभ समादिशद्रणेसर्वान्हतभीममितिस्मह ३० तस्मिन्हतेहतंमन्येपांडुसैन्यम
शेषतः प्रतिगृह्यचतामाज्ञांतवपुत्रस्यपा र्थिवाः ३१ भीमंप्रच्छादयामासुः शरवर्षैः समंततः गजाश्चवहुलाराजन्नराश्चजय
गृद्धिनः ३२ रथेस्थिताश्चराजेंद्रपरिवव्रुर्वृकोदरं सतैःपरिवृतःशूरैःशूरोराजन्समंततः ३३ शुशुभेभरतश्रेष्ठनक्षत्रैरिवचं
द्रमाः परिवेषीयथासोमः परिपूर्णोविराजते ३४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

रम॰
१६५

नरा जेतव्यासंरब्धदर्शनीयो नरोत्तमः निर्विशेषो महाराज पूर्वाह्णे विजयस्तथा ३५ ततस्ते पार्थिवाः सर्वे शरवृष्टिं समासृजन् क्रोधरक्तेक्षणाः क्रूरा
हंतुकामा वृकोदरं ३६ स विदार्य महासेनां शरैः संनतपर्वभिः निश्चक्राम रणाद्भीमो मत्स्यो जालादिवांभसि ३७ हत्वा दश सहस्राणि गजानामनिवर्ति
नां नृणां शतसहस्रे द्वे द्वे शते चैव भारत ३८ पंच चाश्वसहस्राणि रथानां शतमेव च हत्वा प्रास्यंदयद्भीमो नदीं शोणितवाहिनीं ३९ शोणितोदां रथा
वर्तां हस्तिग्राहसमाकुलां नरमीनाश्वनक्रां तां केशशैवलशाद्वलां ४० संछिन्नभुजनागेंद्रबहुरत्नापहारिणीं ऊरुग्राहां मज्जपंकां शीर्षोपलसमा
वृतां ४१ धनुःकाशां शरावापां गदापरिघकेतनां हंसछत्रध्वजोपेतां उष्णीषवरफेनिलां ४२ हारपद्माकरां चैव भूमिरेणूर्मिमालिनीं आर्या
ह्णवतीं संख्ये सुतरां भीरुदुस्तरां ४३ योधग्राहवतीं संख्ये वहंतीं पितृसादनं क्षणेन पुरुषव्याघ्रः प्रावर्तयत निम्नगां ४४ यथा वैतरणी मुग्धा दुस्तरा
मकृतात्मभिः तथा दुस्तरणी घोरा भीरूणां भयवर्द्धिनी ४५ यतो यतः पांडवेयः प्रविष्टो रथसत्तमः ततस्ततोपातयत योधाञ्छतसहस्रशः ४६
एवं दृष्ट्वा कृतं कर्म भीमसेनेन संयुगे दुर्योधनो महाराज शकुनिं वाक्यमब्रवीत् ४७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

जयमातुलंसंग्रामेभीमसेनंमहाबलं अस्मिन्जितेजितंमन्येपांडवेयंमहाबलं ४८ ततः प्रायान्महाराजसौबलेयः प्रतापवान् रणायमहतेयुक्तो
भ्रातृभिः परिवारितः ४९ समासाद्यसंग्रामेभीमंभीमपराक्रमं वारयामासतंवीरोवेलेवमकरालयं ५० सन्यवर्त्ततभीमोवार्यमाणः शितैः श
रैः शकुनिस्तस्यराजेंद्रवामपार्श्वेस्तनांतरे ५१ प्रेषयामासनाराचान्रुक्मपुंखान्शिलाशितान् वर्मभित्वातुतेघोराः पांडवस्यमहात्मनः ५२ न्यमज्जंत
महाराजकंकबर्हिणवाससः सोतिविद्धोरणेभीमः शरंरुक्मविभूषितं ५३ प्रेषयामाससहसासौबलंप्रतिभारत तमायांतंशरंघोरंशकुनिः शत्रुताप
नः ५४ चिच्छेदसप्तधाराजन्कृतहस्तोमहाबलः तस्मिन्निपतितेभूमौभीमः क्रुद्धोविशांपते ५५ धनुश्चिच्छेदभल्लेनसौबलस्यहसन्निव तदपास्य
धनुश्छिन्नंसौबलेयः प्रतापवान् ५६ अन्यदादायवेगेनधनुर्भल्लांश्चषोडश तेषांतुमहाराजभल्लैः सन्नतपर्वभिः ५७ द्वाभ्यांससारथिंह्यर्छ
द्भीमंसप्तभिरेवच ध्वजमेकेनचिच्छेदद्वाभ्यांछत्रंविशांपते ५८ चतुर्भिश्चतुरोवाहान्विव्याधसुबलात्मजः ततः क्रुद्धोमहाराजभीमसेनः प्रता
पवान् ५९ ॥ ॥ ॥ ॥ ॥ ॥ ॥

शक्तिंचिक्षेपसमरेरुक्मदंडामयस्मयीं सा भीमभुजनिर्मुक्तानागजिह्वेवचंचला ६० निपपातरणेतूर्णंसौबलस्यमहात्मनः ततस्तामेवसं गृह्य
शक्तिंकनकभूषणां ६१ भीमसेनायचिक्षेपक्रुद्धरूपोविशांपते सानिर्भिद्यभुजंसव्यंपांडवस्यमहात्मनः ६२ निपपाततदाभूमौयथाविद्युन्नभश्च्युता
अथोत्क्रुष्टंमहाराजधार्तराष्ट्रैःसमंततः ६३ नतुतंममृषेभीमःसिंहनादंतरस्विनां अभ्यगृह्यधनुःसज्यंत्वरमाणोमहाबलः ६४ मुहूर्तादिवरा
जेंद्रछादयामाससायकैः सौबलस्यबलंसंख्येत्यक्त्वात्मानंमहाबलः ६५ तस्याश्वांश्चतुरोहत्वासूतंचैवविशांपते ध्वजंचिच्छेदभल्लेनत्वरमाणःपरा
क्रमी ६६ हताश्वंरथमुत्सृज्यत्वरमाणोनरोत्तमः तस्थौविस्फारयंश्चापंक्रोधरक्तेक्षणःश्वसन् ६७ शरैश्चबहुधाराजन्भीममार्छत्समंततः प्रति
हत्यतुवेगेनभीमसेनःप्रतापवान् ६८ धनुश्चिच्छेदसंक्रुद्धोविव्याधचशितैःशरैः सोतिविद्धोबलवताशत्रुकर्शनः ६९ निपपाततदाभूमौकिं
चित्प्राणोनराधिपः ततस्तंविह्वलंज्ञात्वापुत्रस्तवविशांपते ७० अपोवाहरथेनाजौभीमसेनस्यपश्यतः रथस्थेतुनरव्याघ्रेधार्तराष्ट्राःपराङ्मुखाः ७१

क०

१६०

प्रदुद्रुवुर्दिशोभीताभीमाज्जातेमहाभये सौवलेनिर्जितेराजन्भीमसेनेनधन्विना ७२ भयेनमहताविष्टः पुत्रोदुर्योधनस्तव अपायाज्जवनैरश्वैः सोपश्लो
मातुलंप्रति ७३ पराङ्मुखंतुराजानंदृष्ट्वासैन्यानिभारतविप्रजग्मुः समुत्सृज्यद्वैरथानिसमंततः ७४ तान्दृष्ट्वाविद्रुतान्सर्वान्धार्तराष्ट्रान्पराङ्मुखा
न्जवेनाभ्यापतन्भीमः किरन्शरशतान्बहून् ७५ तेवध्यमानाभीमेनधार्तराष्ट्राः पराङ्मुखाः कर्णमासाद्यसमरेस्थिताराजन्समंततः ७६ सहि
तेषांमहावीर्योद्वीपोऽभून्महाबलः भिन्ननौकायथाराजन्द्वीपमासाद्यनिर्वृताः ७७ भवंतिपुरुषव्याघ्रनाविकाः कालपर्यये तथाकर्णंसमासा
द्यताविकाः पुरुषर्षभ ७८ समाश्वस्ताःस्थिताराजन्संप्रहृष्टाः परस्परं समाजग्मुश्चयुद्धायमृत्युंकृत्वानिवर्त्तनं ७९ इतिश्रीमहाभारतेकर्णपर्व
णि धृतराष्ट्रउवाच ततोभग्नेषुसैन्येषुभीमसेनेनसंयुगे दुर्योधनोऽब्रवीत्किंतुसौवलोवापिसंजय १ कर्णोवाजयतांश्रेष्ठोयोधावामामकायुधि
कृपोवाकृतवर्माचद्रौणिर्दुःशासनोऽपिवा २ अत्यद्भुतमहंमन्येपांडवेयस्यविक्रमं यथैकः समरेसर्वान्योधयामासमामकान् ३ यथाप्र
तिज्ञंयोधानांराधेयः कृतवानपिकुरूणामथसर्वेषांकर्णःशत्रुनिषूदनः ४ ॥ ॥ ॥ ॥ ॥ ॥ ॥

राम०

१६०

शर्मेधर्मप्रतिष्ठाचजीविनाशाञ्चसंजय तमप्रमग्नंवलंदृष्ट्वाकौंतेयेनामितौजसा ५ राधेयोवाप्याधिरथिः कर्णश्चकिमकरोद्युधि पुत्रावाममदुर्द्धर्षौरा
जानौवाममहारथाः ६ एतन्मेसर्वमाचक्ष्वकुशलोह्यसिसंजय ६ संजयउवाच अपराह्णेमहाराजसूतपुत्रःप्रतापवान् जघानसोमकान्सर्वान्भीम
सेनस्यपश्यतः ७ भीमोप्यतिबलंसैन्यंधार्त्तराष्ट्रंव्यपोथयत् अथकर्णोब्रवीच्छल्यंपांचालान्प्रापयस्वमां ८ द्राव्यमाणंवलंदृष्ट्वाभीमसेनेनधीमता
यंतारमब्रवीत्कर्णः पांचालानेवमांवह ९ मद्रराजस्ततः शल्यः श्वेतानश्वान्महाजवान् प्राहिणोच्चेदिपांचालान्करूषांश्चमहाबलः १० प्रवि
श्यचमहत्सैन्यंशल्यःपरबलार्दनः न्यपद्येत्तुरगान्हृष्टोयत्रयत्रैच्छदग्रणीः ११ तंरथंमेघसंकाशंवैयाघ्रपरिवारणं संदृश्यपांडुपांचालास्त्रस्ताह्या
सन्विशांपते १२ ततोरथस्यनिनदः प्रादुरासीन्महारणे पर्जन्यसमनिर्घोषः पर्वतस्येवदीर्यतः १३ ततः शरशतैस्तीक्ष्णैः कर्णः आकर्ण
निःसृतैः जघानपांडववलंशतशोथसहस्रशः १४ तत्तथासमरेकर्मकुर्वाणमपराजितं परिवव्रुर्महेष्वासाः पांडवानांमहारथाः १५ तंशिखंडी
चभीमश्चधृष्टद्युम्नश्चपार्षतः नकुलः सहदेवश्चद्रौपदेयाश्चसात्यकिः १६ ॥ ॥ ॥ ॥ ॥ ॥ ॥

क॰
१६८

परिवव्रुर्जिघांसंतोराधेयंशरवृष्टिभिः सात्यकिस्तुततःकर्णंविंशत्यानिशितैःशरैः १७ अजघानत्रुपदेशेश्रूरोजत्रुदेशेनरोत्तमः शिखंडीपंचविंशत्या धृष्टद्युम्नश्चसप्तभिः १८ द्रौपदेयाश्चतुःषष्ट्यासहदेवश्चसप्तभिः नकुलश्चशतेनाजौकर्णंविव्याधसायकैः १९ भीमसेनस्तुराधेयंनवत्यान तपर्वणां विव्याधसमरेक्रुद्धोजत्रुदेशेमहाबलः २० अथप्रहस्याधिरथिर्विक्षिपन्धनुरुत्तमं मुमोचनिशितान्बाणान्पीडयन्सुमहाबलः २१ तान्प्र त्यविध्यद्राधेयः पंचभिःपंचभिःशरैः सात्यकेस्तुधनुश्छित्वाध्वजंचभरतर्षभ २२ अथैनंनवभिर्बाणैराजघानस्तनांतरे भीमसेनस्ततःक्रुद्धोविव्या धत्रिंशताशरैः २३ सहदेवस्यभल्लेनध्वजंचिच्छेदमारिष सारथिंचत्रिभिर्बाणैराजघानपरंतपः २४ विरथान्द्रौपदेयांश्चचकारभरतर्षभ अक्ष्णोर्निमेषमात्रेणतदद्भुतमिवाभवत् २५ विमुखीकृत्यतान्सर्वान्शरैःसन्नतपर्वभिः पांचालानहनच्छूरांश्चेदीनांचमहारथान् २६ तेवध्यमानाःसमरेचेदिमत्स्याविशांपते कर्णमेकमभिद्रुत्यशरसंघैःसमर्पयन् २७ तान्जघानशितैर्बाणैःसूतपुत्रोमहारथः एतदत्यद्भु तंकर्मदृष्टवानस्मिभारत २८ यदेकःसमरेशूरान्सूतपुत्रःप्रतापवान् यतमानान्परंशक्त्यायोधयत्तांश्चधन्विनः २९ ॥ ॥ ॥ ॥

राम॰
१६८

पांडवेयान्महाराजशरैर्वारितवान्रणे तत्रभारतकर्णस्यलाघवेनमहात्मनः ३० तुष्टुवुर्देवताःसर्वाःसिद्धाश्चसहचारणैः अपूजयन्महेष्वासा

धार्त्तराष्ट्रानरोत्तमं ३१ कर्णंरथवरश्रेष्ठंश्रेष्ठंसर्वधनुष्मतां ततःकर्णोमहाराजददाहरिपुवाहिनीं ३२ कक्षमिद्धोमहावह्निर्निदाघेज्वलितोमहान्

तेवध्यमानाःकर्णेनपांडवेयास्ततस्ततः ३३ प्राद्रवंतरणेभीताःकर्णंदृष्ट्वामहारथं तत्राक्रंदोमहानासीत्पांचालानांमहारणे ३४ वध्यतांसायकै

स्तीक्ष्णैःकर्णचापवरच्युतैः तेनशब्देनवित्रस्तापांडवानांमहाचमूः ३५ कर्णमेकंरणेयोधंमेनिरेतत्रशात्रवाः तत्राद्भुतंपुनश्चक्रेराधेयःशत्रुक

र्शनः ३६ यदेनंपांडवाःसर्वेनशेकुरभिवीक्षितुं यथौघःपर्वतश्रेष्ठमासाद्याभिप्रदीर्यते ३७ तथातत्पांडवंसैन्यंकर्णमासाद्यदीर्यते कर्णोपिस

मेराजन्विधूमोग्निरिवज्वलन् ३८ ददहतस्थौमहाबाहुःपांडवानांमहाचमूं शिरांसिचमहाराजकर्णांश्चैवसकुंडलान् ३९ बाहूंश्चवीरोवीरा

णांचिच्छेदलघुचेषुभिः हस्तिदंतत्सरून्खड्गान्ध्वजाञ्छक्तीर्हयान्गजान् ४० रथांश्चविविधान्राजन्पताकाव्यजनानिच अक्षंचयुगयोक्त्राणिच

चक्राणिविविधानिच ४१

क०
१६९

विव्हेरिववृकुधाकर्णोयोधव्रतमनुष्ठितः तत्रभारतकर्णेननिहतैर्गजवाजिभिः ४२ अगम्यरूपापृथिवीमांसशोणितकर्दमा विषमंचसमंचैवहते
रश्वपदातिभिः ४३ रथैश्चकुंजरैश्चैवनप्राज्ञायतकिंचन नापिस्वेनपरेयोधाः प्राज्ञायंतपरस्परं ४४ घोरेशरांधकारेतुकर्णास्त्रेचविजृंभिते राधेयचा
पनिर्मुक्तैः शरैः कांचनभूषणैः ४५ संछादितामहाराजपांडवानांमहारथाः तेपांडवेयाः समरेराधेयेनपुनः पुनः ४६ अभज्यंतमहाराजयतमाना
महारथाः मृगसंघायथाक्रुद्धः सिंहेनाद्रावयंतवने ४७ पांचालानांरथश्रेष्ठान्द्रावयन्शात्रवांस्तथा कर्णःससमरेयोधांस्त्रासयन्सुमहाय
शाः ४८ कालयामासतत्सैन्यंयथापशुगणान्वृकः दृष्ट्वातुपांडवींसेनांधार्तराष्ट्राः पराङ्मुखीं ४९ तत्राजग्मुर्महेष्वासारुवंतोभैरवान्रवा
न् दुर्योधनोहिराजेंद्रमुदापरमयायुतः ५० वादयामाससंहृष्टोनानावाद्यानिसर्वशः पांचालापिमहेष्वासाभग्नास्तेनरोत्तमाः ५१ न्यवर्तंतय
थाशूरंसंयुक्तानिवर्तनं तान्निवृत्तान्रणेशूरान्राधेयः शत्रुतापनः ५२ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

राम०
१६९

अनेकशोमहाराजवर्मंतंपुरुषर्षभः तत्रभारतकौंतपांचालान्विंशतीरथाः ५३ निहताःसायकैःक्रोधाच्चेदयश्चपरंशताः कृत्वाशून्यांस्ततोरथो
पस्थान्वाजिरथांश्चभारत ५४ निर्मनुष्यान्गजस्कंधान्सहस्तांश्चैवविद्रुतान् आदित्यइवमध्याह्नेदुर्निरीक्ष्यःपरंतपः ५५ कालांतकवपुःशूरःसूत
पुत्रोम्यराजत एवमेतन्महाराजनरवाजिरथद्विपान् ५६ हत्वातस्थौमहेष्वासःकर्णोरिगणसूदनः यथाभूतगणान्हत्वाकालस्तिष्ठेन्महाबलः
५७ तथासमोमकान्हत्वा तस्थावेकोमहारथः तत्राद्भुतमपश्यामपांचालानांपराक्रमं ५८ वध्यमानापियत्कर्णंनाजहूरणमूर्धनि राजादुःशास
नश्चैवकृपःशारद्वतस्तथा ५९ अश्वत्थामाकृतवर्माशकुनिश्चमहाबलः न्यहनन्पांडवींसेनांशतशोथसहस्रशः ६० कर्णपुत्रौतुराजेंद्रभ्रातरौ
सत्यविक्रमौ निजघ्नतुर्बलंक्रुद्धौपांडवानामितस्ततः ६१ तत्रयुद्धंमहच्चासीत्क्रूरंविशसनंमहत् तथैवपांडवाःशूराधृष्टद्युम्नशिखंडिनौ ६२ द्रौ
पदेयाश्चसंक्रुद्धाअभ्यघ्नंस्तावकंबलं एवमेषक्षयोवृत्तःपांडवानांततस्ततः ६३ तावकानामपिरणेभीमंप्राप्यमहाबले ६४ इतिश्रीमहाभारते
कर्णपर्वणि ॥ ६४ ६४

क०
१७०

अर्जुनस्तु १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ ॥

संजयउवाच अर्जुनस्तुमहाराजहत्वासैन्यंचतुर्विधं सूतपुत्रंचसंक्रुद्धंदृष्ट्वैवमहारणे १ शोणितोदांमहींकृत्वामांसमज्जास्थिपंकिलां मनु
ष्यशीर्षपाषाणांहस्त्यश्वकृततरोधसं २ शूरास्थिचयसंकीर्णांकाकगृध्रानुनादितां छत्रहंसप्लवोपेतांवीरवृक्षापहारिणीं ३ हारपद्माकरव
तींमुष्णीषवरफेनिलां धनुःशरध्वजोपेतांनरक्षुद्रकपालिनीं ४ चर्मवर्मभ्रमोपेतांरथोडुपसमाकुलां जयैषिणांचसुतरांभीरूणांचसुदुस्त
रांनदींप्रावर्तयित्वाचबीभत्सुःपरवीरहा वासुदेवमिदंवाक्यमब्रवीत्पुरुषर्षभः ६ अर्जुनउवाच एषकेतूरणेकृष्णसूतपुत्रस्यदृश्यते भीमसे
नादयश्चैतेयोधयंतिमहारथं ७ एतेद्रवंतिपांचालाःकर्णात्रस्ताजनार्दन एषदुर्योधनोराजाश्वेतच्छत्रेणधार्यता ४ कर्णेनभग्नान्पांचाला
न्द्रावयन्बहुशोभते कृपश्चकृतवर्माचद्रौणिश्चैवमहारथः ९ एतेरक्षंतिराजानंसूतपुत्रेणरक्षिताः अवध्यमानास्तेस्माभिर्घातयिष्यंति
सोमकान् १० एषशल्योरथोपस्थेरश्मिसंचारकोविदः सूतपुत्ररथंकृष्णवाहयन्बहुशोभते तत्रमेबुद्धिरुत्पन्नावाहयात्रमहारथं नाहत्वा
समरेकर्णंनिवर्तिष्येकथंचन १२ ॥ ॥

रा०
१७०

मो३

राधेयोप्यन्यथापार्थो धनंजयाश्च महारथान् निःशेषान्समरे कुर्यात्सपत्नान्नो जनार्दन १३ ततः प्रायाद्रथेनाशु केशवस्तव वाहिनीं कर्णप्रतिम
हेष्वासैर्द्वैरथे सव्यसाचिना १४ प्रयातश्च महाबाहुः पांडवानुज्ञया हरिः आश्वासयन्रथेनैव पांडुसैन्यानि सर्वशः १५ रथघोषः संसंग्रामे पांडव
यस्य संबभौ वासवाशनितुल्यस्य महौघस्येव मारिष १६ महता रथघोषेण पांडवः सत्यविक्रमः अभ्ययादप्रमेयात्मा निर्जेयस्तव वाहिनीं १७
तमायांतं समीक्ष्यैव श्वेताश्वं कृष्णसारथिं मद्रराजोब्रवीत्कर्णं केतुं दृष्ट्वा महात्मनः १८ अयं स रथ आयाति श्वेताश्वः कृष्णसारथिः १९ निघ्नन्न
मित्रान्समरे यं कर्ण परिपृच्छसि १९ एष तिष्ठति कौंतेयः संस्पृशन्गांडिवं धनुः तं हनिष्यसि चेदद्य तन्नः श्रेयो भविष्यति २० ज्यामभिप्रमृशन्याति क
र्णानि घ्नन्वरान्रथान् असह्यमानो राधेय तं पाहि प्रतिभारत २१ एषा विदीर्यते सेना धार्तराष्ट्री समंततः अर्जुनस्य भयात्तूर्णं निघ्नतः शात्रवान्
बहून् २२ वर्जयन्सर्वसैन्यानि त्वरते हि धनंजयः त्वदर्थमिति मन्येहं यथासोदीर्यते वपुः २३ न ह्यवस्थास्यते पार्थो युयुत्सुः केनचित्सह
त्वामृते क्रोधदीप्तो हि पीड्यमाने वृकोदरे २४ विरथं धर्मराजं तु दृष्ट्वा सुदृढविक्षतं शिखंडिनं सात्यकिं च धृष्टद्युम्नं च पार्षतं २५ द्रौपदेयान्युधा
मन्युमुत्तमौजसमेव च नकुलं सहदेवं च भ्रातरौ द्वौ समीक्ष्य च २६ सहसैकरथः पार्थस्त्वामभ्येति परंतपः क्रोधरक्तेक्षणः क्रुद्धो जिघांसुः सर्व
पार्थिवान् २७ त्वरितोभिपतत्यस्मांस्त्यक्त्वा सैन्यान्यशेषतः त्वं कर्ण प्रतियाह्येनं नास्त्यन्यो हि धनुर्धरः २८

नतंपश्यामिलोकेस्मिंस्त्वत्तोन्यंधनुर्द्धरं अर्जुनंसमरेक्रुद्धंयोवेलामिववारयेत् २९ नचास्यरक्षांपश्यामिपार्श्वतोनचपृष्ठतः एकएवाभिया
तिस्त्वांपश्यसाफल्यमात्मनः ३० त्वंहिकृष्णौरणेशक्तः संसाधयितुमाहवे तथैवंभोराधेयप्रत्युद्याहिधनंजयं ३१ समानोह्यसिभीष्मेणद्रोणद्रौणिनाथ
कृपेनच सव्यसाचि नमायांतंनिवारयमहारणे ३२ ले[illegible]हानंयथासर्पंगर्जंतमृषभंयथा वनस्थितंयथाव्याघ्रंजहिकर्णधनंजयं ३३ ऐते
द्रवंतिसमरेधार्त्तराष्ट्रामहारथाः अर्जुनस्यभयात्तूर्णंनिरपेक्षाजनाधिपाः द्रवतामथतेषांतुनान्योस्तियुधिमानवः भयहारीभवेद्वीरस्त्वामृतेत्रसू
तनंदन ऐतेत्वांकुरवःसर्वेद्वीपमासाद्यसंयुगे ३५ धिष्ठितापुरुषव्याघ्रत्वत्तःशरणकांक्षिणः वैदेहांबष्टकांबोजास्तथानग्नजितस्त्वया ३६
गांधारास्त्वयायाधृष्याजिताःसंख्येसुदुर्जयाः तांधृतिंकुरुराधेयततःप्रत्येहिपांडवं ३७ वासुदेवंचवार्ष्णेयंप्रीयमाणंकिरीटिना प्रत्युद्याहि
महाबाहोपौरुषेमहतिस्थितः ३८ कर्णउवाच प्रकृतिस्थोसिमेशल्यइदानीं ॥ ॥ ॥ ॥ ॥ ॥

संमतस्तथा प्रतिभासि महाबाहो मा भैषीस्त्वं धनंजयात् ३८ पश्यबाह्वोर्बलंमेघशिक्षि तस्यचपश्यमे एकोहनिहनिष्यामिपांडवानांमहाचमूं
३९ कृष्णौचपुरुषव्याघ्रौततःसत्यंब्रवीमितेनाहत्वायुधितौवीरौअपयास्येकथंचन ४० शिष्येवानिहतस्ताभ्यामनित्योहिरणेजयः कृतार्थोद्य
भविष्यामिहत्वावाप्यथवाहतः ४१ शल्यउवाच अजय्यमेनंप्रवदंतियुद्धेमहारथाः कर्णरथप्रवीरं एकाकिनंकिमुकृष्णाभिगुप्तंविजेतुमेनंकइ
होत्सहेत ४२ कर्णउवाच नैतादृशोजातुबभूवलोकेरथोत्तमोयावदुपश्रुतंनः तमीदृशंप्रतियोत्स्यामिपार्थंमहाहवेपश्यचपौरुषंमे ४३
रणेचरत्येषरथप्रवीरःसितैर्हयैःकौरवराजपुत्रः स घमांनेष्यतिकृच्छ्रमेतत्कर्णस्यांतादेतदंतास्तुसर्वे ४४ अस्वेदिनौराजपुत्रस्यहस्तावेजं
थमारोगजातकिरीणाबृहंतौदृढायुधःकृतिमानक्षिप्रहस्तोनपांडवेयेनसमोस्तियोधः ४५ गृह्णात्यनेकानपिकंकपत्रानेकंयथातान्क्षितियोज्यवाशु
तेक्रोशमात्रेनिपतंत्यमोघाःकस्तेनयोधोस्तिसमःपृथिव्यां ४६ अतोषयत्पांडवेयोहुताशंकृष्णद्वितीयोतिरथस्तरस्वी लेभेचक्रंपत्रकृष्णोमहा
त्माधनुर्गांडीवंपांडवःसव्यसाची ४७ श्वेताश्वयुक्तंचसुघोषमग्र्यंरथंमहाबाहुरदीनसत्वः महेषुधीचाक्षयपदिव्यरूपेशस्त्राणिदिव्यानिचहव्य
वाहात् ४८ तथेंद्रलोकेनिजघानदैत्यानसंख्येयान्कालकेयांश्चसर्वान् लेभेशंखंदेवदत्तंस्मतत्रकोनामतेनाभ्यधिकःपृथिव्यां ४९ ॥

महादेवंतोषयामासयोस्त्रैः साक्षात्सुयुद्धेनमहानुभावः लेभेजनः पाशुपतंसुघोरंत्रैलोक्यसंहारकरंमहास्त्रं ५० पृथक्पृथक्लोकपालाः
समेतास्तुमहास्त्राण्यप्रमेयाणिसंख्ये येस्तान्जघानाशुरणेनृसिंहः सकालकेयानसुरान्समेतान् ५१ तथाविराटस्यपुरेसमेतान्सर्वानस्मान्
एकरथेनजित्वा जहारतद्गोधनमाजिमध्येवस्त्राणिचादत्तमहारथेभ्यः ५२ तमीदृशंवीर्यगुणोपपन्नंकृष्णद्वितीयंपरमंनृपाणां तमाह्वयन्साहस
मुत्तमंवैजानेनसंपंसर्वलोकस्यशल्य ५३ अनंतवीर्येणचकेशवेननारायणेनाप्रतिमेनगुप्तः वर्षायुतैर्यस्यगुणानशक्यावक्तुंसमेतैरपिसर्व
लोकैः ५४ महात्मनःशंखचक्रासिपाणेर्विष्णोर्जिष्णोर्वसुदेवात्मजस्य भयंचमेजायतेसाध्वसंचदृष्ट्वार्जुनावेकरथेसमेतौ ५५ अतीवपार्थो
युधिकार्मुकेभ्योनारायणश्चाप्रतिचक्रयुद्धे एवंविधौपाण्डववासुदेवौचलेत्स्वदेशाद्धिमवान्[illegible] कृष्णौ ५६ उभौहिशूरौबलिनौदृढायुधौमहारथौ
सं[illegible]हननोपपन्नौएतादृशौफाल्गुनवासुदेवौकोन्यःप्रतीया[illegible]द्विधेतौतुशल्य ५७ मनोरथोयस्तवमभाद्यतस्यमद्रेशयुद्धेप्रतिपाण्डवस्यनै
नचिराद्दाशुभविष्यतीदमत्यद्भुतंचित्रमतुल्यरूपं ५८ एतौचहत्वायुधियातपिष्यमांवापिकृष्णौनिहनिष्यतोऽद्य इतिब्रुवन्शल्यममित्रहंताक
र्णोरणेमेघइवोन्ननाद ५९

अथैनं सपुत्रेणागतं वाभिनंदितः सोमदत्तोवाचकुरुप्रवीरं कृपं चभोजं चमहाभुजावुभौ त्तथैव गांधारपतिं महानुजं ६० गुरोः सुतं चावरजं तथात्मनः प
दातिनोथद्रुपसाहिनश्चतान् निरुध्यताभिद्रवतान्युतार्जुनोथमेराश्संयोजयताश्रुसर्वशः ६१ यथा वह्निर्हिमशैविस्रुतावुभौमुखेनहन्यामहमघमूमि
पाः तथेतिचोक्ताश्चरितास्मनेर्जुनंजिघांसवोवीरजनाः समापयुः ६२ शरैश्चजघ्नुर्युधितंमहारथा धनंजयं कर्णनिदेशकारिणः नहीनरेश्चरिजलो
महार्णवोयथातथासैंसमेरर्जुनोग्रसत् ६३ नसंदधानो न तथाशरोत्तमान्प्रमुंचमानोरिपुभिः प्रदृश्यते धनंजयास्त्रैस्तशरैर्विदारिता हतानि
पेतुर्नरवाजिकुंजराः ६४ शरार्चिषं गांडिवचारुमंडलंयुगांतसूर्यप्रतिमानतेजसं नकौरवाः शेकुरुदीक्षितुंजयं यथा रविंव्याधितचक्षुषोजना
ः ६५ शरोत्तमान्सप्रहितान्महारथैश्चिच्छेदपार्थः प्रहसंछरौघैः भूयश्चतानहन्महाराणसंधानांगांडीवधन्वापतपूर्णमंडलं यथोग्ररश्मिः शुचि
शुक्रमध्यगोमुखंविवस्वान्हरतेजलौघात् तथार्जुनोवारणराजानिरस्य हृद्रान्हिसेनांतवपार्थिवेंद्र ६० तमभ्यधावद्विसृजन्कृपः शरांस्तथैवभो
जस्तवचात्मजः स्वयं महारथोद्रौणसुतश्चसायकैरवाकिरंस्तोयधरायथाचलं ६८ ६९ ६८ ६८ ॥

क० १७३

शुचि शुक्रयोः आषाढज्येष्ठयोर्मध्यगतः ६६ आयुधं आयुधज्ञानं उपनिकीर्यनि बंगको शराद्भिर्मोनिष्क्राशयभल्लेनभल्लतुल्येहतास्यसारथिध्वजसरथेस्था

जिघांसुर्मिल्लानकुशलः शरैरन्नमानमहाहवे संजविनान्यपन्नतः शरैः प्रचिच्छेदस पाण्डवस्त्वरन् पराभिनद्धृस सिचेषुभिस्त्रिभिः ६७
संगादिवव्यायत शूरांमेरलसत्पत्रिषून्नर्जुनभास्करोरवभौ शरोग्ररश्मिः शुचिशुक्रमध्यगोयथैवसूर्यः परिवेषवांस्तथा ६८ अथा
श्ववोरोरेषुभिर्द्धनंजयं पराभिनद्द्रोणसुतोच्युतं त्रिभिः चतुर्भिरश्वांश्चतुरः कपिंततः शरैरश्वनाराचवरैरवाकिरत् ६९ तथापितं प्रसु
रद्धन्नकार्मुकं त्रिभिः शरैर्यन्तशिरः क्षुरेण हयांश्चतुर्भिस्त्रपुनस्त्रिभिर्ध्वजं धनंजयो द्रोणिरथादपातयत् ७० सरोषपूर्णो मणिवज्र
हाटकैरलंकृतं तक्षकभोगवर्चसं महाधनं कार्मुकमन्यदाददेयथा महाहिप्रवरं गिरेस्तटात् ७१ स्वमायुधं चोपनिकीर्यभूतले धनुश्च
कृतोस्तगुणागुणाधिकः समाहृयंता वजितौ नरोत्तमौ शरोत्तमैर्द्रौणिरविध्यदन्तिकात् ७२ कृपश्च भोजश्च तवात्मजश्च ते शरैरनेकैर्यु
धियाण्डवर्षभं महारथाः संयुगमूर्ध्नि निष्ठिताः समोनुदं वारिधराइवापतन् ७३ कृपस्य पार्थः सशरं शरासनं हयान्ध्वजान्सारथिमेवप
त्रिभिः समार्पयद्बाहुसहस्रविक्रमस्तथायथावज्रधरः पुरा बलेः ७४ सपार्थबाणैर्विनिपातितायुधो ध्वजावमर्देच कृते महाहवे कृतः
कृपो बाणसहस्रयन्त्रितोयथापगेयः प्रथमं किरीटिना ७५

पस्ति ७२ ७३ ७३ ७४ ७५

द्रण० १७३

शौरेः प्रविद्धेस्तवात्मजस्यध्वजंधनुश्चप्रचकर्त्तनर्दतः जघानचाश्वान्कृतवर्मणः शुभान्ध्वजंचचिच्छेदततः प्रतापवान् ७६ सवाजिसूतेष्वसना
न्यकेतनान्जघाननागाश्वरथांस्त्वरंस्ततः ततः प्रकीर्णंसुमहद्बलंतवप्रदारितंसेतुरिवांभसायथा ७७ ततोर्जुनस्याशुरथेनकेशवश्चकारश
त्रूनपसव्यमातुरान् ततः प्रयांतंत्वरितंधनंजयंशतक्रतुंवृत्रनिजघ्नुषंयथा ७८ समन्वधावन्पुनरुच्छ्रितैर्ध्वजैरथैः सुयुक्तैरपरेयुयुत्सवः अ
थाभिसृत्यप्रतिवार्यतानरीन्धनंजयस्याभिमुखंमहारथाः ७९ शिखंडिशैनेययमाः शितैः शरैर्विदारयंतोव्यनदन्सुभैरवं ततोभिजघ्नुः कुपि
ताः परस्परंशरैस्तदांजोगतिभिः सुतेजनैः ८० कुरुप्रवीराः सहसृंजयैर्यथासुराः पुरादेवगणैस्तथाहवे जयेप्सवः स्वर्गमनायचोत्सुकाः
पतंतिनागाश्वरथाः परंतप ८१ जगर्जुरुच्चैर्बलवच्चविव्यधुः शरैः सुमुक्तैरितरेतरंपृथक् शरांधकारेतुमहात्मभिः कृतेमहाहवेयोधवरैः प
रस्परं ८२ चतुर्दिशोवैविदिशश्चपार्थिवप्रभावसूर्यस्यतमोवृतोभवत् ८३ इतिकर्णपर्वणि संजयउवाच राजन्कुरूणांप्रवरैर्बलैर्भीमम
भिद्रुतं मज्जंतमिवकौंतेयमुज्जिहीर्षुर्द्धनंजयः १ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

विनघ्नतस्तपुत्रस्यसेनांभारतसायकैः प्राहिणोन्मत्युलोकायपरवीरान्धनंजयः २ ततोसंवरमाश्रित्यशरजालानिभागशः अदृश्यंततथा
स्यचनिजघ्नुस्तववाहिनी ३ सपक्षिसंघाचरितमाकाशंपूरयन्शरैः धनंजयोमहाबाहुः कुरूणामंतकोभवत् ४ ततोभल्लैः क्षुरप्रैश्चनाराचै
र्विमलैरपि गात्राणिप्राछिनत्पार्थः शिरांसिचचकर्तह ५ छिन्नगात्रैर्विकवचैर्विशिरस्कैः समंततः पतितैश्चपतद्भिश्चयोधैरासीत्समावृता
६ धनंजयशराभ्यस्तैः स्यंदनाश्वरथद्विपैः संछिन्नभिन्नविध्वस्तैर्व्यंगांगावयवैस्तृता ७ सुदुर्गमासुविषमाघोरा त्यर्थंसुदर्दृशा रणभू
मिरभूद्राजन्महावैतरणीयथा ८ ईषाचक्राक्षभग्नैश्चव्यश्वैः साश्वैश्चयुध्यतां ससूतैर्हतसूतैश्चरथैस्तीर्णाभवन्मही ९ सुवर्णवर्ण
संनाहैर्योधैःकनकभूषणैः आस्थिताः क्रुप्तवर्माणोभद्रानित्यमदाद्विपाः १० क्रुद्धाः क्रूरैर्महामात्रैः पार्ष्ण्यंगुष्टप्रचोदिताः चतुःशताः
शरवर्षैर्हताःपेतुःकिरीटिना ११ पर्यस्तानीवशृंगाणिससत्वानिमहागिरेः धनंजयशराभ्यस्तैस्तीर्णाभूद्वरवारणैः १२ समंताज्जलद
प्रख्यान्वारणान्मदवर्षिणः अभिपेदेर्जुनरथोघनान्भिंदन्निवांशुमान् १३

२१

हतेर्गजमनुष्याश्वैर्भिन्नैश्चव रुधिरार्द्रैः विशल्ययंत्रकवचैर्युद्धे योद्धैर्गतासुभिः १४ अपविद्धायुधैर्मार्गेस्ताक्षोभत्स्फाल्गुनेन वै विस्फारयन्वै
गांडीवं सुमहास्वरं वै १५ घोरवज्रविनिष्पेषस्तनयित्नोरिवांबरे ततः पार्थेन तच्चमूर्द्धनंजयशराहता १६ महावातसमाविद्धा महानौरिव साग
रे नानारूपाः प्राणहराः शरा गांडीवचोदिताः १७ अलातोल्काशनिप्रख्यास्तव सैन्यं विनिर्दहन् महागिरौ वेणुवनं निशि प्रज्वलितं यथा १८
तथा तव महासैन्यं प्रासुरच्छरपीडितं संपिष्टदग्धविध्वस्तं तव सैन्यं किरीटिना १९ हतं प्रविहतं बाणैः सर्वतः प्रद्रुतं दिशः महावने मृगगणा दावा
ग्नित्रासिता यथा २० कुरवः पर्यवर्त्तंत निर्दग्धाः सव्यसाचिना उत्सृज्य च महाबाहुं भीमसेनं तथा रणे २१ बलं कुरूणामुद्विग्नं सर्वमासीत्परा
ङ्मुखं ततः कुरुषु भग्नेषु बीभत्सुरपराजितः २२ भीमसेनं समासाद्य मुहूर्त्तं सोभ्यवर्त्तत समागम्य च भीमेन मंत्रयित्वा च फाल्गुनः २३
विशल्यमनुजं चास्मै कथयित्वा युधिष्ठिरं भीमसेनाभ्यनुज्ञातस्ततः प्रायाद्धनंजयः २४ नादयन्रथघोषेण पृथिवीं द्यां च भारत ततः परि
वृतो वीरैर्दशभिर्योधपुंगवैः २५ दुःशासनादवरजैस्तव पुत्रैर्धनंजयः ते तमभ्यर्दयन्वीरा उल्काभिरिव कुंजरं २६ ॥ ॥ ॥ ॥ ॥

क०
१७५

ध्वातेते ध्वसनाः भूराङ्कंपत इव भारत अपसव्यांस्ततांश्चक्रे रथेनमधुसूदनः २७ विपुत्ता नहितत्तान्मेनेयमायाप्सु किरीटिना तत
स्त्रिमाइव नश्यूराः पराङ्मुखरथेर्जुने २८ तेषामापततां केतूनश्वांश्चापानि सायकान् नाराचैरर्द्धचंद्रैश्च क्षिप्रं पार्थो न्यपातयत् २९ अथा
न्यैर्दशभिर्भल्लैः शिरांस्येषामपातयत् रोषसंरक्तनेत्राणि संदष्टौष्ठानि भूतले ३० तानि वक्त्राणि विबभुः कमलानीव भूरिशः तांस्तु भल्लैर्म
हावेगैर्दशभिर्दशकौरवान् ३१ रुक्मांगदान्रुक्मपुंखैर्हत्वा प्रायादमित्रहा ३२ इति श्रीमहाभारते कर्णपर्वणि संजय उवाच तं प्रयांतं महावे
गैरश्वैः कपिवरध्वजं युद्धायाभ्यद्रवन्वीराः कुरूणां नवतीरथाः १ कृत्वा संशप्तका घोरं शपथं पारलौकिकं परिवव्रुर्नरव्याघ्रा नरव्याघ्रं
रणेर्जुनं २ कृष्णः श्वेतान्महावेगानश्वान्कांचनभूषणान् मुक्ताजालप्रतिच्छन्नान्प्रैषीत्कर्णरथं प्रति ३ ततः कर्णरथं यांतमरिघ्नं तं धनं
जयं बाणवर्षैरभिघ्नंतः संसप्तका ययुः ४ त्वरमाणांस्तु तान्सर्वान्ससूतेषु धनध्वजान् जघान नवतिं वीरानर्जुनो निशितैः शरैः ५ तेप
तन्हता बाणैर्नानारूपैः किरीटिना सविमाना यथासिद्धाः स्वर्गात्पुण्यक्षये तथा ६ श्रीकृष्णायनमः श्रीकृष्णायनमः ॥

राम०
१७५

ततः सरथनागाश्वाः कुरवः कुरुसत्तम निर्भया भरतश्रेष्ठमभ्यवर्त्तन्त फाल्गुनं ७ तद्रथबलमनुष्याश्वमुदीर्णं वरवारणं पुत्राणां ते महासै
न्यं समरे रौत्सीद्धनंजयं ८ शक्त्यृष्टितोमरप्रासैर्गदानिस्त्रिंशसायकैः प्राच्छादयन्महेष्वासाः कुरवः कुरुनंदने ९ तामंतरिक्षे विततां शस्त्रवृष्टिं
समंततः अधमत्पांडवो बाणैस्तमः सूर्य इवांशुभिः १० ततो म्लेच्छास्थितैर्मत्तैस्त्रयोदशशतैर्गजैः पार्श्वतो व्यहनन्पार्थं तव पुत्रस्य शासना
त् ११ कर्णिनालीकनाराचैस्तोमरप्रासशक्तिभिः मुसलैर्भिंडिपालैश्च रथस्थं पार्थमार्दयन् १२ तां शस्त्रवृष्टिमतुलां द्विपहस्तैः प्रवेरि
तां चिच्छेद निशितैर्भल्लैरर्द्धचंद्रैश्च फाल्गुनः १३ अथ तान्द्विरदान्सर्वान्नानालिंगैः शरोत्तमैः सपताकध्वजारोहान्गिरीन्वज्रैरिवाहनत्
१४ ते हेमपुंखैरिषुभिरीर्द्दिता हेममालिनः हताः पेतुर्महानागाः साग्निज्वाला इवाद्रयः १५ ततो गांडीवनिर्घोषो महानासीद्विशांपते स्तनतां
कूजतां चैव मनुष्यगजवाजिनां १६ कुंजराश्च हता राजन्दुद्रुवुस्ते समं ततः अश्वाश्च पर्यधावंत हतारोहा दिशो दश १७ रथा हीना महाराज र
थिभिर्वाजिभिस्तथा गंधर्वनगराकारा दृश्यंते स्म सहस्रशः १८ अश्वारोहा महाराज धावमाना इतस्ततः तत्र तत्रैव दृश्यंते निहताः पार्थसायकैः

१९

तस्मिन्क्षणेपांडवस्यबाह्वोर्बलमदृश्यत यत्संदिनोवारणांश्चरथांश्चैकोजयद्युधि २० ततस्त्रिगेणमहताबलेनभरतर्षभ दृष्ट्वापरिवृतंरा
जन्भीमसेनःकि रीटिनं २१ हतावशेषाननुत्सृज्यत्वदीयान्कतिचिद्रथान् जवेनाभ्यद्रवन्राजन्धनंजयरथंप्रति २२ ततस्तत्प्राद्रवत्सैन्यं
हतभूयिष्ठमातुरं दृष्ट्वार्जुनंतदाभीमोजगामभ्राजंरथंप्रति २३ हतावशिष्टांस्तुरगानर्जुनेनमहाबलान् भीमोव्यधमदश्रान्तोगदापाणिर्महाहवे २४
कालरात्रिमिवात्युग्रांनरनागाश्वभोजनां प्राकाराट्टपुरद्वारदारणीमतिदारुणां २५ ततोगदांनृनागाश्वेषुतांभीमोव्यवासृजत् सजघान
बहून्अश्वानश्वारोहांश्चमारिष २६ कार्ष्णायसतनुत्राणान्नरानश्वांश्चपांडवः पोथयामासगदयासशब्दंतेपतन्हताः २७ दंतैर्दशंतोवसुधां
शेरतेक्षतजोक्षिताः भग्नमूर्धास्थिचरणाः क्रव्यादगणभोजनाः २८ असृङ्मांसवसाभिश्चतृप्तिमभ्यागतागदा अस्थीन्यप्य[illegible]तीतस्थौ
कालरात्रीवदुर्दृशा २९ सहस्राणिदशाश्वानांहत्वापत्तींश्चभूयसः भीमोभ्यधावत्संक्रुद्धोगदापाणिरितस्ततः ३० गदापाणिंततोभीमंदृष्ट्वाभा
रततावकाः मेनिरेसमनुप्राप्तंकालदंडोद्यतंयमं ३१ समत्तइवमातंगःसंक्रुद्धःपांडुनंदनः प्रविवेशगजानीकंमकरःसागरंयथा ३२

स्न३

विगाह्यचगजानीकंप्रगृह्यमहतींगदां क्षणेनभीमःसंक्रुद्धस्तन्निन्येयमसादनं ३३ गजान्सकंकटान्मत्तान्सारोहान्सपताकिनः पततः

समपश्यामसपक्षान्पर्वतानिव ३४ हत्वातुमद्रजानीकंभीमसेनोमहाबलः पुनःस्वरथमास्थायपृष्ठतोर्जुनमन्वयात् ३५ हतंपराङ्मु

खंप्रायैर्निरुत्साहंपरबलं व्यालंबतमहाराजप्रायशःशस्त्रवेष्टितं ३६ विलंबमानंतत्सैन्यमप्रगल्भमवस्थितं दृष्ट्वाप्राच्छादयद्बाणैरर्जुनःप्रा

णतापनैः ३७ नराश्वरथमातंगायुधिगांडीवधन्वना शरव्रातैश्चितारेजुःकदंबाइवकेसरैः ३८ ततःकुरूणामभवदार्त्तनादोमहान्नृप

नराश्वनागासुहरैर्वध्यतामर्जुनेषुभिः ३९ हाहाकृतंभृशंतत्रसंलीयमानंपरस्परं अलातचक्रवत्सैन्यंतदाभ्रमततावकं ४० ततस्तद्युद्ध

मभवत्कुरूणांसुमहद्बलैः नस्यत्रासीदनिर्भिन्नोरथःसादीहयोगजः आदीप्तमिवतत्सैन्यंशरैश्छिन्नतनुच्छदं आसीत्स्वशोणितक्लिन्नंफु

ल्लाशोकवनंयथा ४२ तंदृष्ट्वाकुरवस्तत्रविक्रांतंसव्यसाचिनं निराशाःसमपद्यंतसर्वेकर्णस्यजीविते ४३ अविषह्यंतुपार्थस्यशरसंबा

धमाहवे मत्वान्यवर्त्तंतकुरवोजितागांडीवधन्वना ४४ तेहित्वासमरेकर्णंवध्यमानाश्चसायकैः प्रदुद्रुवुर्दिशोभीताश्चुक्रुशुश्चापिसूतजं

४५ अभ्यद्रवत्तान्पार्थःकिरन्शरशतान्बहून् हर्षयन्पांडवान्योधान्भीमसेनपुरोगमान् ४६ ॥ ॥ ॥ ॥ ॥ ॥

क॰ १७७

पुत्रास्तेनेमहाराजजग्मुःकर्णरथंप्रति अगाधेमज्जमानानांद्वीपःकर्णोभवत्तदा ४७ कुरवोहिमहाराजनिर्विषाःपंनगाइव कर्णमेवोपली
यंतभयाद्द्रोणिवधन्वनः ४८ यथासर्वाणिभूतानिमृत्योर्भीतानिमारिष धर्ममेवोपलीयंतेकर्ममेवंतिहिपार्थिव ४९ तथाकर्णंमहेष्वासंपुत्रास्त
वनराधिप उपालीयंतसंत्रासात्साऽस्वसमहात्मनः ५० तांछोणितपरिक्लिन्नान्विषमस्थाञ्छरातुरान् माभैरित्यब्रवीत्कर्णोह्यभितोमामितेतिच
५१ संभग्नंहिबलंदृष्ट्वाबलात्पार्थेनतावकं धनुर्विस्फारयन्कर्णस्तस्थौशत्रुजिघांसया ५२ तान्प्रद्रुतान्कुरून्दृष्ट्वाकर्णःशस्त्रभृतां
वरः संचिंतयित्वापार्थस्यवधेदध्रेमनःश्वसन् ५३ विस्फार्यसुमहच्चापंततस्त्वाधिरथिर्वृषः पांचालान्पुनराधावत्पश्यतःसव्यसाचिनः ५४
ततःक्षणेनक्षितिपाःक्षतजप्रतिमेक्षणाः कर्णंववर्षुर्बाणौघैर्यथामेघामहीधरं ततःशरसहस्राणिकर्णमुक्तानिमारिष व्ययोजयं
तपांचालान्प्राणैःप्राणभृतांवर ५६ ततःशब्दोमहानासीत्पांचालानांमहामते वध्यतांसूतपुत्रेणमित्रार्थेमित्रगृद्धिना ५७ इतिश्री
महाभारतेकर्णपर्वणि ॥ ॥

राम॰ १७७

१ २ ३ ४ ५ अंजोगतिभिःपृशायतोन्नसृष्टैः ६ ७ ८ ९ १० ११

संजयउवाच ततःकर्णःकुरुषुप्रद्रुतेषुवरूथिनाश्वेतहयेनराजन् पांचालपुत्रान्व्यधमत्सूतपुत्रोमहेषुभिर्वातइवाभ्रसंघा
न् १ सूतंरथादंजलिकेननिपात्यजघानचाश्वान्जनमेजयस्य शतानीकंसुतसोमंचभल्लैरवाकिरद्धनुषीचाप्यकृंतत् २
धृष्टद्युम्नंनिर्बिभेदाथषड्भिर्जघानाश्वान्दक्षिणंतस्यसंख्ये हत्वाचाश्वान्सात्यकेःसूतपुत्रःकैकेयपुत्रंन्यवधीद्विशोकं ३ तम
भ्यधावन्निहतेकुमारेकैकेयसेनापतिरुग्रकर्मा शरैर्विधुन्वन्भृशमुग्रवेगैःकर्णात्मजंचाप्यहनत्सुषेणं ४ तस्यार्द्धचंद्रैस्त्रि
भिरुच्चकर्तप्रसह्यबाहूचशिरश्चकर्णः सस्यंदनाद्गामपतद्गतासुः परश्वधैःशालइवावरुग्णः ५ हताश्वमंजोगतिभिःप्रसेनः
शिनिप्रवीरंनिशितैःपृषत्कैःप्रच्छादयन्नृत्यन्निवकर्णपुत्रःशैनेयबाणाभिहतःपपात ६ पुत्रेहतेक्रोधपरीतचेताःकर्णःशि
नीनामृषभंजिघांसुः हतोसिशैनेयइतिब्रुवन्सव्यवासृजद्बाणममित्रसाहं ७ तमस्यचिच्छेदशरैःशिखंडीत्रिभिस्त्रिभिश्चप्रतु
तोदकर्णं शिखंडिनःकार्मुकंचध्वजंचछित्वाक्षुराभ्यामपतत्सुजातः ८ शिखंडिनंषड्भिरविध्यदुग्रोधार्ष्टद्युम्नेःसशिरश्चाप्यकृ
न्तत् तथाभिनत्सुतसोमंशरेणसुसंशितेनाधिरथिर्महात्मा ९ अथाक्रंदेतुमुलेवर्त्तमानेधार्ष्टद्युम्नेनिहतेतत्रकृष्णः अपांचाल्यं
क्रियतेयाहिपार्थकर्णंजहीत्यब्रवीद्राजसिंह १० ततःप्रहस्याशुनरप्रवीरोरथंरथेनाधिरथेर्जगाम भयेतेषांत्राणमिच्छन्सु

११ प्रतिश्रुतः प्रतिस्वनः १२ १३ १४ १५ १६ १७ १८ १९ २०

विस्फार्य गांडीवमथोग्रघोषं ज्यया समाहत्य तले भृशं च बाणांधकारं सहसैव कृत्वा जघान नागाश्वरथध्वजांश्च ११ प्रतिश्रुतिः
प्राचरन्नंतरिक्षे गुहा गिरीणामयतन्वयांसि यन्मंडलज्यं न विजृंभमाणो रौद्रो मुहूर्तं प्रपपात किरीटी १२ तं भीमसेनो नुययौ
रथेन पृष्ठे रक्षन्पांडवमेकवीरः तौ राजपुत्रौ त्वरितौ रथाभ्यां कर्णाययानावरिभिर्विविक्तौ १३ तत्रांतरे सुमहान्सूतपुत्रश्चक्रे।
युद्धं सोमकान्संप्रमृद्गन् रथाश्वमातंगगणाञ्जघान प्रच्छादयामास शरैर्दिशश्च १४ तमुत्तमौजा जनमेजयश्च क्रुद्धो युधामन्यु
शिखंडिनौ च कर्णं बिभेदुः सहिताः पृषत्कैः समर्दमानाः सह पार्षतेन १५ ते पंच पंचालरथप्रवीरा वैकर्तनं कर्णमभिद्रवं
तः तस्माद्रथाच्यावयितुं न शेकुर्धैर्यात्कृतात्मानमिवेंद्रियार्थाः १६ तेषां धनूंषि ध्वजवाजिसूतांस्तूणान्पताकाश्च निकृत्य
बाणैः तान्पंचभिस्त्वभ्यहनत्पृषत्कैः कर्णस्ततः सिंह इवोन्ननाद १७ तस्यास्यतस्तानभिनिघ्नतश्च ज्याबाणहस्तस्य धनुः
स्वनेन साद्रिद्रुमा स्यात्पृथिवी विशीर्णेत्यतीव मत्वा जनता व्यषीदत् १८ स शक्रचापप्रतिमेन धन्वना ततायतेनाधि
रथिः शरान्सृजन् बभौ रणे दीप्तमरीचिमंडलो यथांशुमाली परिवेषवांस्तथा १९ शिखंडिनं द्वादशभिः पराभिनच्छितैः
शरैः षड्भिश्चोत्तमौजसं त्रिभिर्युधामन्युमविध्यदाशुगैस्त्रिभिस्त्रिभिः सोमकपार्षतात्मजौ २०

स्ता

पराजिताः पंचमहारथास्तेनमहाहवे स्तत्सुतेनमारिष निरुध्यमा[illegible]स्तुरमित्रघ्नं रुनायेयैर्द्विपार्थोत्मवतापराजिताः २१ निमज्जतस्तानथक
र्णसागरेविपन्ननावोवणिजोयथार्णवे उद्दधिरेनौभिरिवार्णवाद्रथैः सुकल्पितैर्द्रौपदिजाःस्वमातुलान् २२ ततः शिनीनामृषभः शितैः श
रैर्निकृत्यकर्णप्रहितानिषून्बहून् विदार्यकर्णंनिशितैरयस्मयैस्तवात्मजंज्येष्ठमविध्यदष्टभिः २३ कृपोऽथभोजश्चतवात्मजस्तथास्वयंच
कर्णोनिशितैरताडयत् सतैश्चतुर्भिर्युयुधेयदूत्तमोदिगीश्वरैर्दैत्यपतिर्यथातथा २४ समानतेनेष्वसनेनकूजताभृशायतेनामितबाणवर्षि
णा बभूवदुर्धर्षतरःससात्यकिः शरन्नभोमध्यगतोयथा[illegible]रविः २५ पुनः समास्थायरथान्सुदंशिताः शिनिप्रवीरंजुगुपुः परंतपाः समे
त्यपांचालमहारथारणेमरुद्गणाः शक्रमिवारिनिग्रहे २६ ततोऽभवद्युद्धमतीवदारुणंतदाहितानांतवसैनिकैः सह रथाश्वमातंगविनाश
नंतथायथासुराणामसुरैः पुराभवत् २७ रथद्विपावाजिपदातयस्तथाभवंतिनानाविधशस्त्रवेष्टिताः परस्परेणाभिहताश्चचस्खलुर्विने
दुरार्त्ताश्चमवोपतंस्तथा २८ तथागतेभीममभीस्तवात्मजः ससारराजावरजः किरन्छरैः ततोऽभ्यधावत्त्वरितोवृकोदरोमहारुरुंसिंहइवाभि
पेदिवान् २९ ततस्तयोर्युद्धमतीवदारुणंप्रदीव्यतोःप्राणदुरोदरंद्वयोः परस्परेणाभिनिविष्टरोषयोरुदग्रयोः शंबरशक्रयोर्यथा ३०
शरैः शरीरांतकरैः सुतेजनैर्निजघ्नतुस्तावितरेतरंभृशं सकृत्प्रभिन्नाविववाशितांतरेमहागजौमन्मथसक्तचेतसौ ३१ तवात्मजस्याथ
वृकोदरस्त्वरन्धनुः क्षुरेणांध्वजमेवचाछिनत् ललाटमप्यस्यविभेदपत्रिणाशिरश्चकायात्प्रजहारसारथेः ३२ सराजपुत्रोऽन्यदवाप्यका
र्मुकंवृकोदरंद्वादशभिः [illegible] पराभिनत् स्वयंनियच्छंस्तुरगानजिह्मगैः शरैश्चभीमंपुनरप्यवीवृषत् ३३ ततः शरंसूर्यमरीचिसप्रभं
सुवर्णवज्रोत्तमरत्नभूषितं महेंद्रवज्राशनिपातदुःसहंमुमोचभीमांगविदारणक्षमं ३४ सतेननिर्विद्धतनुर्वृकोदरोनिपातितः स्रस्त

नि४

[illegible] न

नुर्गतास्तु वत् प्रसार्य वाहूरथवर्यमाश्रितः पुनः संज्ञामुपलभ्य वानदत् ३५ इति श्रीकर्णपर्वणि संजय उवाच तत्राकरोत् दुष्करं राजपुत्रो
दुःशासनस्तुमुलं युध्यमानः चिच्छेद भीमस्य धनुः क्षुरेण षड्भिः शरैः सारथिमप्यविध्यत् १ सततकृत्वा राजपुत्रस्तरस्वी विव्याध भीमं नवभिः पृष
त्कैः ततोऽभिनद्धं बहुभिः क्षिप्रमेव वरेषुभिर्भीमसेनं महात्मा २ ततः क्रुद्धो भीमसेनस्तरस्वी शक्तिं वेगवतां प्राहिणोत्ते सुताय तामापतन्तीं सहसा
तिघोरां दृष्ट्वा सुतस्ते ज्वलितामिवोल्कां ३ आकर्णपूर्णैरिषुभिर्महात्मा चिच्छेद पुत्रो दशभिः पृषत्कैः दृष्ट्वा तु तत्कर्म कृतं सुदुष्करं प्रहृ जय
न सर्वयोधाः प्रहृष्टाः ४ अथाशु भीमं च शरेण भूयो गाढं स विव्याध सुतस्तरीयः चुक्रोध भीमः पुनराशु तस्मै भृशं प्रजज्वाल रुषाभिवी
क्ष्य ५ विद्धोऽस्मि वीराशु भृशं त्वया घसहस्व भूयोऽपि गदाप्रहारं उक्त्वैवमुच्चैः कुपितोऽथ भीमो जग्राह तां भीमगदां वधाय ६ उवाच चाद्याह
माहं दुरात्मन्पास्यामि ते शोणितमाजिमध्ये अथैवमुक्तस्तव तनयस्ततोग्रां शक्तिं वेगात्प्राहिणोन्मृत्युरूपां ७ आविध्य भीमोऽपि गदां सुघो
रां विचिक्षिपे रोषपरीतमूर्तिः सा तस्य शक्तिं सहसा विरुज्य पुत्रं तवाजौ ताडयामास मूर्ध्नि ८ स विक्षरन्नाग इव प्रभिन्नो गदामस्मै तुमुले
प्राहिणोद्वै तयाहरद्दश धन्वन्तराणि दुःशासनं भीमसेनः प्रसह्य ९ तयाहतः पतितो वेपमानो दुःशासनो गदया वेगवत्या हयाः स
सूता निहता नरेन्द्र चूर्णीकृतश्चास्य रथः पतन्त्या १० विध्वस्तवर्माभरणाम्बरस्रग्विचेष्टमानो भृशवेदनातुरंतपात पिलाथ च कोर
रोऽथ जगर्ज हर्षेण विनादयन्दिशः नादेन तेनाखिलपार्श्ववर्तिनो मूर्छाकुलाः पतितास्त्वाजमीढ दुःशासनं पाण्डवाः प्रेक्ष्य संहृ
ष्टाः पांचालाः सिंहनादानमुंचन् ११ ततः स्मृत्वा भीमसेनस्तरस्वी सापत्नकं यत्प्रयुक्तं सुतैस्ते तस्मिन्सुघोरे तुमुले वर्तमाने प्रधा

ना: ५

नभूपिष्टैर्वैरैः समंतात् दुःशासनं तत्र समीक्ष्य राजन्भीमो महाबाहुरचिन्त्यकर्मा १२ स्मृत्वाथ केशग्रहणं च देव्या वस्त्रापहारं च रजस्व
लायाः अनागसो भर्तृपराङ्मुखायाः दुःखानि दत्तान्यपि विप्रचिंत्य १३ जज्वाल क्रोधादथ भीमसेन आज्यप्रसिक्तो हि यथा हुताशः तत्राह क
र्णं च सुयोधनं च कृपं द्रौणिं कृतवर्माणमेव १४ निहन्मि दुःशासनमद्य पापं संरक्षतामद्य समस्तयोधाः इत्येवमुक्त्वा सहसाभ्यधावन्
निहंतुकामोऽतिबलस्तरस्वी १५ तथा तु विक्रम्य रणे वृकोदरो महागजं केसरिको यथैव निगृह्य दुःशासनमेकवीरः सुयोधनस्याधि
रथैः समक्षं १६ रथादवप्लुत्य गतः स भूमौ यत्नेन तस्मिन्प्रणिधाय चक्षुः स समीप स्थितो भीमो विसंज्ञं वीक्ष्य तं सुतं। चकार खेदं मनसा
चिंतावपरमो ययौ अभेद्यत्तनस्य रुधिरं कथं पास्यामि शिरोरपि। अज्ञाने तोस्य पापस्य दुर्मते मित्रघातिनः एवं विचिंतयन्भीमो दृष्ट्वार्थं वि
चेतनं। वस्त्रेण वीजयं चैनं तेन तं ज्ञानमवाप सः दृष्ट्वा सचेतनं सा पत्नी पादेनाक्रम्य वक्षसि। प्रहृष्टरूपो भीमस्तु सासिं प्राह वाचं ततो पौराजसत्या
वमस्थे पवित्रा जाताकचापा ज्ञसेन्पादुरात्मनं ते पाणिना कर्तेरणा विकृष्टोत्तद्वदि हिं लांपृष्ठते भीमसेन: उक्तस्तथा ज्ञोसन्न दुःशासनोऽराजगाः भीम
परिवृत्तनेत्रः अयं करिकराकारः पीनस्तनविमर्दनः गोसहस्रप्रदाता च क्षत्रियांतकरः करः अनेन याज्ञसेन्या मे भीम केशा विकर्षिताः प
श्यतां कुरुमुख्यानां युष्माकं च सभासदां एवं ब्रुवाणस्य स भीमसेन उत्पाटयामास भुजं महात्मा। ततः सरोषं तमतीव वक्षः संताडयामास भुजे
न तेन असिं समुद्यम्य शितं सुधारं कंठे पदाक्रम्य च वेपमानं १७ उत्कृत्य वक्षः पतितस्य भूमावथापिबच्छोणितमस्य कोष्णं ततो निपात्या
स्य शिरोऽपकृत्य तेनासिना तव पुत्रस्य राजन् १८ सत्यां चिकीर्षुर्मतिमान्प्रतिज्ञां भीमोऽपिबच्छोणितमस्य कोष्णं आस्वाद्य चास्वाद्य च वीक्षमा
णः क्रुद्धोऽतिवेलं निजगाद वाक्यं १९ स्तन्यस्य मातुर्मधुसर्पिषो वा माध्वीकपानस्य च सत्कृतस्य दिव्यस्य वा तोयरसस्य पानात्पयोदधि

दूरा

दि ४

स्तं २

क०
१८०

म्यामथिताच्चमुख्यात् १४ अन्पानिपानानिचयानिलोकेसुधामृतस्वादुरसानितेभ्यः सर्वेभ्यएवाभ्यधिकोरसोयंममाद्यचास्याहितलोहित
स्य १५ अथाहभीमः पुनरुग्रकर्मादुःशासनंक्रोधपरीतचेताः गतासुमालोक्यविहस्यसुस्वरंकिंवाकरोमत्युनारक्षितोसि १६ सएवंब्रुवाणं
पुनराद्रवंतमास्वाद्यमानंतमतिप्रहृष्टं येभीमसेनंददृशुस्तदानींभयेनतेपिव्यथि[illegible]तानिपेतुः १७ येचापिनासन्व्यथितामनुष्यास्तेषांक
रेभ्यः पतितंहिशस्त्रं भयाच्चसंचुक्रुशुरस्वरैस्तेनिमीलिताक्षाददृशुः समंततः १८ सतत्रभीमंददृशुः समंतात् [illegible]शासनंतद्रुधिरंपिवंतं सर्वेप
लायंतभयाभिपन्नानैवैमनुष्यापमितिब्रुवाणाः १९ तस्मिन्कृतेभीमसेनेनरूपेदृष्ट्वाजनाः शोणितंपीयमानं संप्राद्रवंश्चित्रसेनेनसार्द्धंभी
मंरक्षोभाषमाणाभयार्ताः २० युधामन्युः प्राद्रवंतंचित्रसेनंसहानीकस्त्वभ्ययाद्राजपुत्रः विव्याधचैनंनिशितैः पृषत्कैर्व्यपेतभीः सप्तभिरा
शुमुक्तैः २१ संक्रांतभोगस्त्वलेलिहानोमहोरगः क्रोधविषंसिसृक्षुः निवृत्यपांचालजमभ्यविध्यत्त्रिभिः शरैः सारथिमस्यषड्भिः २२
ततः सुपुंखेनसुघर्षितेनसुसंशितेनाग्रशरेणशूरः आकर्णमुक्तेनसमाहितेनयुधामन्युस्तस्यशिरोजहार २३ तस्मिन्हतेभ्रातरिचि
त्रसेनेक्रुद्धः कर्णः पौरुषंदर्शयानः अद्रावयत्पांडवानामनीकंप्रत्युद्यातोनकुलेनामितौजाः २४ भीमोपिहत्वा [illegible] तत्रैवदुःशासनम
मर्षणं पूरयित्वांजलिंभूयोरुधिरस्योग्रनिस्वनः २५ शृण्वतांलोकवीराणामिदंवचनमब्रवीत् एषतेरुधिरंकंठात्पिबामिपुरुषाध
म २६ ब्रूहीदानींतुसंहृष्टः पुनर्गौरितिगौरिति [illegible] ॥ ॥

दुः ४

राम०
१८०

ति येनास्मान्मन्यन्त्यन्तिपुनर्गौरितिगौरिति २० तान्वयं प्रतिनन्दस्यामः पुनर्गौरितिगौरिति प्रमाणकोट्यां शयनं कालकूटस्य भोजनं २८
दंशनं चाहिभिः कृष्णैर्दाहं च जतुवेश्मनि द्यूतेन राज्यहरणमरण्ये वसतिश्च या २९ द्रौपद्याः केशपक्षस्य ग्रहणं च सुदारुणं इषुस्त्राणि
च संग्रामेष्वसुखानि च वेश्मनि ३० विराटभवने यच्च क्लेशोस्माकं पृथग्विधः शकुनेर्धार्तराष्ट्रस्य राधेयस्य च मंत्रिते ३१ अनुभूतानि दुःखानि
तेषां हेतुस्त्वमेव हि दुःखान्येतानि जानीमो न सुखानि कदाचन ३२ धृतराष्ट्रस्य दौरात्म्यात्सपुत्रस्य सदा वयं इत्युक्त्वा वचनं राजन्जयं प्राप्य वृ
कोदरः ३३ पुनराह महाराज स्मयंश्लोकेशवार्जुनौ असृग्दिग्धो विस्रवल्लोहितास्यः क्रुद्धोत्यर्थं भीमसेनस्तरस्वी दुःशासने यद्रणे संश्रु
तं मेतद्धै सत्यं कृतं मद्येह वीरौ अत्रैव दास्याम्यपरं द्वितीयं दुर्योधनं यज्ञपशुं विशस्य शिरो मृदित्वा च पदा दुरात्मनः शांतिं लभिष्ये कौरवा
णां समक्षं ३४ एतावदुक्त्वा वचनं प्रहृष्टो ननाद चोच्चै रुधिरार्द्रगात्रः ननर्त चैवातिबलो महात्मा वृत्रं निहत्येव सहस्रनेत्रः ३५ इति श्रीम
हाभारते कर्णपर्वणि दुःशासनवधः संजय उवाच दुःशासने तु निहते तव पुत्रा महारथाः महाक्रोधविषा वीराः समरेष्वपलायिनः १
दश राजन्महावीर्या भीमं प्राच्छादयंछरैः कवची निषंगी पाशी दंडधारो धनुर्ग्रहः २ अलोलुपः सहः षंढो वातवेगसुवर्चसौ एते समेत्य स
हिता भ्रातृव्यसनकर्षिताः ३ भीमसेनं महाबाहुं मार्गणैः समवारयन् स वार्यमाणो विशिखैः समंतात्तैर्महारथैः ४ भीमः क्रोधाग्निर
क्ताक्षः क्रुद्धः काल इवाबभौ तांस्तु

क०
१८१

भल्लैर्महावेगैर्दशभिर्[illegible]र्दशभारत्तान् ५ रुक्मांगदान्रुक्मपुंखैः पार्थोनिन्येयमक्षयं हतेषुतेषुवीरेषुप्रदुद्रावबलंतव ६ पश्यतः
सूतपुत्रस्यपाण्डवस्यभयार्दितंततः कर्णोमहाराजप्रविवेशमहद्भयं ७ दृष्ट्वाभीमस्यविक्रान्तमन्तकस्यप्रजास्विव तस्यत्वाकारभावज्ञः श
ल्यः समितिशोभनः ८ उवाचवचनंकर्णंप्राप्तकालमरिंदमं माव्यथांकुरुराधेयनैवत्वय्युपपद्यते ९ एतेद्रवन्तिराजानोभीमसेनभयार्दिताः
दुर्योधनश्चसंमूढोभ्रातृव्यसनकर्शितः १० दुःशासनस्यरुधिरेपीयमानेमहात्मना व्यापन्नचेतसश्चैवशोकोपहतचेतसः ११ दुर्यो
धनमुपासन्तेपरिवार्यसमन्ततः कृपप्रभृतयश्चैतेहतशेषाः सहोदराः १२ पाण्डवालब्धलक्षाश्चधनंजयपुरोगमाः त्वामेवाभिमुखा
: शूरायुद्धायसमुपस्थिताः १३ सत्वंपुरुषशार्दूलपौरुषेणसमास्थितः क्षत्रधर्मंपुरस्कृत्यप्रत्युद्याहिधनंजयं १४ भारोहिधार्त्तरा
ष्ट्रेणत्वयिसर्वःसमाहितः तमुद्वहमहाबाहोयथाशक्तियथाबलं १५ जयेस्याद्विपुलाकीर्त्तिर्ध्रुवःस्वर्गःपराजये वृषसेनश्चराधे
यसंक्रुद्धस्तनयस्तव त्वयिमोहंसमापन्नेपाण्डवानभिधावति एतच्छ्रुत्वातुवचनंशल्यस्यामिततेजसः १७ हृदिचावश्यकंभावं
चक्रेयुद्धायसुस्थिरं ततः क्रुद्धोवृषसेनोऽभ्यधावदवस्थितंप्रमुखेपाण्डवंतं १८ वृकोदरंकालमिवात्तदण्डंगदाहस्तंयोधयन्तंत्वदी
यान् तमभ्यधावन्नकुलः प्रवीरोरोषादमित्रंप्रतुदन्पृषत्कैः १९ कर्णस्यपुत्रंसमरेप्रहृष्टंपुराजिघांसुर्मघवेवजंभं ततोध्वजंस्फा
टिकचित्रकंचुकंचिच्छेदवीरोनकुलःक्षुरेण २० कर्णात्मजस्येष्वसनं

रम०
१८१

चचित्रंभल्लेनकर्णावृत्तद्चित्रनर्द्दं अथान्यदादायधनुः सशीघ्रंकर्णात्मजः पांडवमभ्यविध्यत् २१ दिव्यैर्महास्त्रैर्नकुलंकृतास्त्रोदु
: शासनस्यापचितिंपिपासुः ततः क्रुद्धोनकुलस्तंमहात्माशरैर्महोल्काप्रतिमैरविध्यत् २२ दिव्यैरस्त्रैरभ्यवर्षद्वृषसेनोपिकर्णस
पुत्रोनकुलंकृतास्त्रः शराभिघाताच्चरुषाचराजन्स्वयाचभासास्त्रसमीरणाच्च २३ जज्वालकर्णस्यसुतोतिमात्रमिद्धोयथाज्याहुति
भिर्हुताशः कर्णस्यपुत्रोनकुलस्यराजन्सर्वानश्वानक्षिणोदुत्तमास्त्रैः २४ वनायुजान्वैनकुलस्यशुभ्रानुदग्रगान्हेमजालावनद्धान्
ततोहताश्वादवरुह्ययानादादायचर्मामलरुक्मचंद्रं २५ आकाशसंकाशमसिंप्रगृह्यदोधूयमानः खगवच्चचार ततोंतरिक्षे चरथा
श्वनागांश्चिच्छेदतूर्णंनकुलश्चित्रयोधी २६ तेप्रापतन्नसिनागांविशस्तायथाश्वमेधेपशवः शमित्रा द्विसाहस्राः पातिताःपु
ड्रैशोडानानादेश्याःसुभृताःसत्यसंधाः २७ एकेनसंख्येनकुलेनहत्ताजेषुणानुत्तमचंदनांगाः तमापतंतंनकुलंसोभिपत्य
समंततःसायकैःप्रत्यविध्यत् २८ सतुद्यमानोनकुलःपृषत्कैर्विव्याधवीरंसचुकोपविद्धः महाभयेरक्षमाणोमहात्माभ्राताभी
मेनाकरोत्तत्रभीमं तंकर्णपुत्रोव्यधमत्समेकंनराश्वमातंगरथाननेकान् २८ क्रीडंतमष्टादशभिःपृषत्कैर्विव्याधवीरंनकु
लंसरोषः सतेनविद्धोतिभृशंतरस्वीमहाहवेवृषसेनेनराजन् २९ क्रुद्धेनधावन्समरेजिघांसुःकर्णात्मजंपांडुसुतोन्ववीरः
विततपक्षौसहसापतंतंश्येनंयथैवामिषलुब्धमाजौ ३० अवाकिरद्वृषसेनस्ततस्तंशितैःशरैर्नकुलमुदारवीर्यं स॥ ॥

तान्मोघांस्तस्य कुर्वन्शौघान्चचारमार्गान्नकुलश्चित्ररूपान् ३१ अथास्य तूर्णं चरतो नरेन्द्र खङ्गेन चित्रं नकुलस्य तस्य महेषुभिश्चिछेद
मत्कर्णपुत्रो महाहवे चर्म सहस्रतारं ३२ तं चापसंनिशितं तीक्ष्णधारं विकोशमुग्रं गुरुभारसाहं द्विषच्छरीरान्तकरं सुघोरमाधुन्वतः सर्प
मिवोग्ररूपं ३३ क्षिप्रं शरैः षड्भिरमित्रसाहश्चकर्त खङ्गं निशितैः सुवेगैः पुनश्च दीप्तैर्निशितैः पृषत्कैः स्तनान्तरे गाढमथाभ्यविध्यत्
३४ कृत्वा तु तद्दुष्करमार्यजुष्टमन्यैर्नरैः कर्म रणे महात्मा ययौ रथं भीमसेनस्य राजन्शराभितप्तो नकुलस्त्वरावान् ३५ स भीमसेन
स्य रथं हतोश्वो माद्रीसुतः कर्णशराभितप्तः आयुत्रुवे सिंहइवाचलाग्रं संप्रेक्ष्यमाणस्य धनंजयस्य ३६ ततः क्रुद्धो वृषसेनो महात्मा
ववर्ष तावेषुजालेन वीरः महारथावेकरथे समेतौ शरैः प्रभिन्द्विवपाण्डवेयौ ३७ तस्मिन्रथे निहते पाण्डवस्य क्षिप्रं च खङ्गे विशिखैश्च
विकृत्ते अन्ये च संहत्य कुरुप्रवीरास्तं तो निजघ्नुः शरवर्षैरुपेत्य ३८ तौ पाण्डवेयौ परितः समंतात्संहूयमानाविव हव्यवाहौ ३८ भीमार्जु
नौ वृषसेनाय क्रुद्धौ ववर्षतुः शरवर्षं सुघोरं अथाब्रवीन्मारुतिः फाल्गुनं च पश्यस्वैनं नकुलं पीड्यमानं ३९ अयं च नो बाधते कर्ण
पुत्रस्त्वस्मान्द्रवान्नसुपयातु कार्ष्णि सतन्निशम्यैव वचः किरीटी रथं समासाद्य वृकोदरस्य ४० अथाब्रवीन्नकुलो वीक्ष्य वीरमुपाग
तं शान्तय शीघ्रमेतं इत्येवमुक्तः सहसा किरीटी भ्रात्रा समक्षं नकुलेन संख्ये ४१ कपिध्वजं केशवसंगृहीतं प्रैषीडुद्योवृषसेन
स्य वाहान् इति श्रीमहाभारते कर्णपर्वणि वृषसेनयुद्धे नकुलपराजयः संजय उवाच नकुलमथविदित्वा छिन्नबाणं॥ ॥ ॥

सनाभिं विरथमश्मसारं नैकर्णपुत्राह्वमग्नं पवनधुतपताकाह्लादिनो वल्गिताश्वा वरपुरुषनियुक्तास्ते रथाः शीघ्रमीयुः १ उपरसुत
वरिष्ठाः पंचशैनेयषष्ठाः द्रुपददुहितृपुत्राः पंचचामित्रसाहाः द्विरदरथनराश्वान्सूदयंतस्त्वदीयान्भुजगपतिनिकाशैर्मार्गणैरात्त
शस्त्राः २ अथतवरथमुख्यास्तान्प्रतीयुस्त्वरंतः कृपहृदिकसुतौ चद्रौणिदुर्योधनौच ३ शकुनिसुतवृकौचक्राथदेवावृधौचद्वि
रदजलदघोषैः स्यंदनैः कार्मुकैश्च नवनृपरथिवीरास्ते दशैकं चवीराश्चवरशरवराग्र्यैस्तानुपेतान्यरुंधन् ४ नवजलदसवर्णैर्हस्ति
भिस्तानुदीयुर्गिरिशिखरनिकाशैर्भीमवेगैः कुलिंदाः सुकल्पिता हैमवता महोत्कटा रणाभिकामैः कृतिभिः समास्थिताः ५ सुव
र्णजालैर्विततावभुर्गजास्तथा यथा वै जलदाः सविद्युतः कुलिंदपुत्रो दशभिर्महायसैः कृपं ससूताश्वमपीडयद्भृशं ६ ततः श
रद्वत्सुतसायकैर्हतः सहैव नागेन पपात भूतले कुलिंदपुत्रावरजस्तु तोमरैर्दिवाकरांशुप्रतिमैरयस्मयैः ७ रथंचविक्षोभ्यन
नादनर्दतस्ततोस्य गांधारपतिः शिरोहरत् ततः कुलिंदेषु हतेषु तेष्वथ प्रहृष्टरूपास्तव ते महारथाः ८ भृशं प्रदध्मुर्लवणांबुसं
भवान्परांश्च बाणासनपाणयोभ्ययुः अथाभवद्युद्धमतीव दारुणं पुनः कुरूणां सह पांडुसृंजयैः ९ शरासिशक्त्यृष्टिगदापर
श्वधैर्नराश्वनागासुहरं भृशाकुलं रथाश्वमातंगपदातिभिस्ततः परस्परं विप्रहताः पतन्क्षितौ १० यथा सविद्युत्स्तनिता वलाह
काः समाहता दिग्भ्य इवोग्रमारुतैः ततः शतानीकहतान्महागजांस्तथा रथान्पत्तिगणांश्च तावकान् ११ जघान भोजस्तु हयान
थापत

श्रिर

नक्षत्राणि द्विपस्थाना: कृतवर्मणा: शरैः अथापरे द्वैर्भिर्हता महाद्विपा वृषः समर्वायुधयोधकेतना: १२ निपेतुरुर्व्यां व्यसवो निपातितास्तथा
यथावज्रहतामहाबला: १३ कुलिंदराजावरजोर्द्धनंतरं स्तनांतरे प वैरेतार्उयत् तवात्मजंतस्यतवात्मजः शरैः शितैः शरीरंव्यसन
द्विपंचतं १४ सनागराजः सहराजसूनुना पपात रक्तं बहु सर्वतः क्षरन् महेंद्रवज्रप्रहतो बुहागमे यथाजलं गैरिकपर्वतस्तथा १५ कु
लिंदपुत्रप्रहितोपरो द्विपः कृथं समसूताश्वरथं व्यपोथयत् ततोपतत्क्राथशरोभियातितः शकेश्वरो वज्रहतो यथा गिरिः १६ रथी द्वि
पस्थेन हतोपतत्सहैः क्राथाधिपः पर्वतजेन दुर्जयः सवाजिसूतेष्वसनध्वजस्तथा महावातहतो महाद्रुमः १७ वृकोद्विपस्थो
गिरिराजवासिनं भृशं शरैर्द्वादशभिः पराभिनत् ततोवृकं साश्वरथं महाद्विपो द्रुतं चतुर्भिश्चरणैर्व्यपोथयत् १८ सनागराजः
सनियंतृकोपतत् तथारहतो बभ्रुसुतेषुभिर्भृशं सचापिदेवावृधसूनुरर्दितः पपात नुन्नः सहदेवसूनुना १९ विषाणगात्रावरथा
श्वपातितागजेन हंतुं शकुनिंकुलिंदजः जगाम वेगेन भृशार्दयंश्चतं ततोस्यगांधारपतिः शिरोहरत् २० ततः कुलिंदेषु हतेषुतेषु प्रहृष्ट
रूपास्तव ते महारथाः भृशं प्रदध्मुर्लवणांबुसंभवान् परांश्च वाणासनपाणयोभ्ययुः २१ अथाभवद्युद्धमतीवदारुणं पुनः कुरूणां
सह पांडुसृंजयैः शरासिशक्त्यृष्टिगदापरश्वधैः रथाश्वनागासुहरं भृशाकुलं २२ रथाश्वमातंगपदातयस्ततः परस्परं विप्रहताः प
तन्नक्षितौ यथा सविद्युत्स्तनिता बलाहकाः समाहता दिग्भ्यइवोग्रमारुतैः २३ ततः शतानीकमविध्यदायसैस्त्रिभिः शरैः कर्णसुतोऽग्रतु

त्रिभिश्च भीमं नकुलं च सप्तभिर्जनार्दनं द्वादशभिश्च सायकैः २६ ततस्तु कर्मातिमनुष्यकर्मणः समीक्ष्य हृष्टाः कुरवोऽभ्यपूजयन् पराक्र
मज्ञास्तु धनंजयस्य ये कृतोऽयमग्राविति ते तु मेनिरे २७ ततः किरीटी परवीरघाती हताश्वमालोक्य नरप्रवीरः माद्रीसुतं नकुलं लोकम
ध्ये समीक्ष्य कृष्णं भृशविक्षतं च समभ्यधावद्वृषसेनमाहवे स सूतजस्य प्रमुखे स्थितस्तदा तमापतंतं नरवीर[illegible]मुग्रं महाहवे बाणसहस्रधारि
णं २८ अभ्यापतत्कर्णसुतो महारथो यथा महेंद्रं नमुचिः पुरा तथा ततोऽद्भुतेनैकशरेण पार्थं सितेन विद्ध्वा युधि कर्णपुत्रः ननाद नादं
सुमहानुभावो विद्ध्वेव शक्रं नमुचिः स वीरः पुनः स पार्थं वृषसेन उग्रैर्बाणैरयोग्रैर्व्यध्यद्भुजमूले सव्ये ३० तथैव कृष्णं नवभिः समार्दयत्तु
नश्च पार्थं दशभिर्जघान पूर्वं यथा वृषसेनप्रयुक्तैरभ्याहतः श्वेतहयः शरैस्तैः ३१ संरंभमीषद्गमितो वधाय कर्णात्मजस्याथ मनः प्र
दध्रे ततः किरीटी रणमूर्ध्नि कोपात्कृत्वा त्रिशाखां भ्रुकुटीं ललाटे ३२ [illegible] मुमोच तूर्णं विशिखान्महात्मा वधे धृतः कर्णसुतस्य
संख्ये आरक्तनेत्रोऽन्तकशत्रुहंता उवाच कर्णं भृशमुत्स्मयंस्तदा ३३ दुर्योधनं द्रोणिमुखांश्च सर्वानहं रणे वृषसेनं तमुग्रं संपश्य
तः कर्ण तवाद्य संख्ये नयामि लोकं नि[illegible]तैः पृषत्कैः ३४ अनेन चैतावद्भिर्जनानां वृतिः सर्वैर्भवद्भि[illegible]र्ममसूनुर्हतोऽसौ एको रथो मद्विही
नस्तरस्वी त्वहं हनिष्ये भवतां समक्षं ३५ संरक्षतां रथसंस्थाः सुतोऽयं त्वहं हनिष्ये वृषसेनमुग्रं पश्चाद्वधिष्ये त्वामपि संप्रमूढमहं हनि
ष्येऽर्जुनश्चाजिमध्ये ३६ त्वामद्य मूलं कलहस्य संख्ये ॥ ॥ ॥ ॥ ॥ ॥ ॥

शि३